अनु ाशिका

नंबर	विषय	पत्र
१	व्रतपरिकर्मत्वम्	२
२	शीलवत्त्वम्	१७
३	गुणवत्त्वम्	२७
४	ऋजुव्यवहरनामकम्	३०
५	गुरुशुश्रूषा	३७
६	प्रवचनकौशलम्	३९

पुस क ाप्तिस्थान

श्रीजिनदत्तसूरि ज्ञान भंडार.
ठि० गोपिपुरा,
० रत.

त्रू रूपचंद बडेर.
नं. ११ इफ स्ट्रीट,
० कलकत्ता.

भावनगर—आनद प्रिन्टिग प्रेस में शेठ देवचंद दामजीने मुद्रित किया ।



श्री ती छोटीबाई ओसवा – ।.

जन्म श्रावण शुदि ३ संवत् १९३५.

जैन शा की ति के लिये उपधान तप रा महोत्सव आदि धार्मिक कार्यों आपने तन, मन और धन का उदारदिल से जो दीया है वह आप का जी की उज्वळ यशगाथा है। शेठ कनैयालालजी के माफिक आप ही साहित्य का प्रचार, धार्मिक उन्नति और समाजहित के र्य में उदारदिल से अपूर्व सेवा बजा रहे हे. ।

आनंद प्रिन्टीग प्रेस–भावनगर

॥ प्रस्तावना ॥

श्रीगूर्जरधराधीशदुर्लभराजसभासमुद्रोल्लासनचंद्रमसा श्रीचांद्रकुलावतंसेन सुविहितवसतिमार्गप्रवर्त्तकेन खरतरबिरुदधारकेण विद्वज्जनचक्रवाकनयनानंदनेन श्रीजिनेश्वरसूरिणा सकलभव्योपकाराय षट्स्थानकाख्यं प्रकरणं विरचितमिदम् ।

अस्य प्रकरणग्रंथस्य विनिर्मातारः श्रीमज्जिनेश्वरसूरयः केषां विनेयावतंसा आसन् ? कस्मिन् समये खरतरबिरुदं समासादितवन्तः ? कॉस्कॉंश्च निर्मितवन्तो ग्रंथान् ? कदा कतमान् स्वपादपद्मपरागेण जनपदान् मंडयामासुः ? इति जिज्ञासायां संक्षेपाद् अत्र परिचयो दीयते, उपदेशपदटीकाकारकाणां[1] अर्बुदाचलजिनचैत्यवृषभजिनप्रतिष्ठापकाणां श्रीजिनवर्धमानसूरीश्वराणां सुकुमारपादकमलेषु श्रीजिनेश्वरसूरयः तेषां लघुभ्रातरो बुद्धिसागराचार्याः संसारसागरतरणपोतं दीक्षां जगृहुः, ततः अल्पसमयेन सर्वसिद्धान्तमवगाह्य षड्दर्शनशास्त्रपारगा जाताः, अन्यदा श्रीवर्धमानसूरयः श्रीजिनेश्वरबुद्धिसागराद्यष्टादश–साधुभिः परिवृता भूमंडले विहरंतः क्रमशो गूर्जरराष्ट्रे श्रीपत्तननगरं गतवंतः, तत्र च जिनगृहनिवासलंपटाः चैत्यवासिसूराचार्याः आसन्, तैश्चैत्यवासिभिश्च देशांतरागतमुनीनां वसतिमार्गविरोधाय स्वमंतव्यसमर्थनाय च वादाय ते श्रीजिनेश्वरसूरयः उत्तेजिताः, तदानीं श्रीचौलुक्य-

---

१ हारिभद्रीयोपदेशपदटीकाप्रशस्तिप्रान्ते—

जिनवचनविचारे नित्यमाश(स)क्तयोगैः । सुविमलगुणरंध्रैः वर्धमानप्र [illegible]द्रैः ॥
इयमुपदेशपदानां टीका रचिता जनावबोधाय । पंचाधिकपंचाशद्युक्ते १०५५ संवत्सरसहस्रे ॥ (जे॰ भा॰ सू॰)

वंशोद्भवश्रीदुर्लभराजमहाराजसभायां राजमान्यविद्वज्जनसमक्षं चैत्यवासियतीनां श्रीजिनेश्वरसूरिभिः सह वादोऽभूत्, तदा प्रथमं सूराचार्यैः वसतिवासप्रतिषेधकं जिनगृहवाससमर्थकं स्वकपोलकल्पितशास्त्रप्रमाणं दर्शितम्.

अथ श्रीजिनेश्वरसूरिभिः कुमतांधकारनभोमणिशय्यंभवस्वामिविरचितदशवैकालिकसूत्रादिकानां वसतिवासप्रदर्शकं जिनगृहनिवासनिषेधकं च अनेकप्रमाणसंदर्भं दर्शयित्वा तेषां मतं खंडितम्, तदा चैत्याचार्याः प्रत्युत्तरदाने असमर्थाः जाताः, तदानीं चैत्यवासिनां शास्त्रविरुद्धश्लथाचारं प्रेक्ष्य श्रीजिनेश्वरसूरीणां जैनसिद्धान्ताविरुद्धाचारदर्शनेन श्रीपत्तनाधीशदुर्लभमहाराजैः 'खरतर' इति बिरुदं दत्तम् पुनश्च गुरुत्वेनाङ्गीकृतास्ते सूरयः तेन राज्ञा, तदनन्तरं सूरीश्वराणामिलामण्डले विहारं कुर्वता जिनचंद्राऽभयदेवधनेश्वरसूरिप्रभृतयोऽनेके शिष्या अभूवन् ।

पुनश्च वि० सं० १०८० वर्षे श्रीहारिभद्रीयाष्टकानां वृत्ति विदधुः सं. १०९२ वर्षे लीलावतीकथां अकुर्वन्, सं. ११०८ वर्षे कथाकोपपंचलिङ्गीपट्स्थानकप्रमाणलक्ष्मादिग्रंथाः रचिताः ।

---

१ " अवट्ठ पगडलेणं " श्रीजिनेश्वरसूरिणोक्त एवंविधे परगृहे वसति साधवो न देवगृहे श्रीदुर्लभराजचित्तेऽतीव तत् लग्नं भणितं चाहो यथा वदंति एते तथैव (गण. सा. वृ)

२ अस्य शब्दस्य व्युत्पत्ति –अतिशयेन खरा सत्यप्रतिज्ञा ये ते खरतराः यद्वा रा. सूर्यः तद्वद् राजन्ते नि प्रतिमप्रतिभाप्राग्भारप्रभाभि प्रतिवादिविद्वज्जनसंसदि ये ते खरा अत एव तरन्ति भवाब्धिमिति तरा. खराश्च ते तराश्च खरतराः ।

३ दुर्लभसेनाने थोडाची वर्ष राज्यकेले । त्याने आपला गुरु श्रीजिनेश्वरसूरीजो म्हणुनहोता त्याने उपदेशाने जैनधर्माची शिक्षा स्वीकारून् त्या धर्मान्तता मोठा प्रवीण जाला होता ईत्यादि । (गुज. इति.)

प्रान्तसमये विधिपूर्वकं शनं कृत्वा र्गं गताः, इत्येवं श्रीजिनेश्वरसूरयः श्रीतीर्थंकरोपदर्शितवसतिमार्गप्र[१] ः आसन्, एषां सूरीश्वराणां आजन्म निर्वाणसंवत्सरो न ज्ञायते, किन्तु एषां पूज्यानां निर्मितग्रन्थेभ्यः १०८० संवत्सरसमयेधारामण्डले विहरत आसन् इति ग्रन्थात् अवबुध्यते ।

श्रीजिनेश्वरसूरितः सर्वत्र वसतिवासप्रवर्तितः खरतरगच्छोऽपि प्रसिद्धिं जातः अस्मिन् विषये बहूनि प्रमाणानि प्रसिद्धानि सन्ति तथाऽपि कानिचित् प्रासंगिकानि प्रदर्श्यन्ते—

वि० सं० ११२० तमे वर्षे श्रीअभयदेवसूरिः स्थानाङ्गसूत्रवृत्तिप्रान्ते—

प्रबुद्धप्रतिबंधप्रवक्तृप्रवीणाप्रतिहतप्रवचनार्थप्रधानवाक्-प्रसरस्य सुविहितमुनिजनमुख्यस्य श्रीजिनेश्वराचार्यस्य तदनुजस्य च व्याकरणादिशास्त्रकर्तुः श्रीबुद्धिसागराचार्यस्य इत्यादि ।

वि० सं० ११३९ वर्षे श्रीगुणचंद्रगणिविनिर्मितप्राकृतवीरचरित्रप्रशस्तिप्रान्ते—

भवजलेहि वीइसंभंत भवियसंताण तारणसमत्थो । बोहित्थोव्व महत्थो सिरिजिणेसरो पढमो ॥ ५१ ॥

गुरुमीराओ धवलाओ सुविहिया[२] साहुसंती जाया । हिमवंता गंगुव्व निग्गया सयलज पुज्जा ॥ ५२ ॥

---

१ सुविहित इति खरतरमुनि ाणमुख्य. इति उक्तम् ।

२ सुविहितसाधुसंतति जाता इति वाक्येन खरतरसततिप्रचलितं इति ध्वनितम्, शोभनं विहितं आचरितं येषा साधुसाध्वीश्रावकाणा ते सुविहिता, अ. रा. को. ।

सं. ११३२, ११४१, ११६९, १२११, वर्षेषु क्रमशः जन्मदीक्षासूरिपदस्वर्गभाजः श्रीजिनदत्तसूरयः गणधरसार्द्धशतके—

तेसिं पयपउमसेवारसिओ भमरुव्व सव्वभमरहिओ । ससमयपरसमयपयत्थसत्थवित्थारणसमत्थो ॥ ६४ ॥
अणहिल्लवाडए नाडइव्व दंसियसुपत्तसंदोहे । पउरपए बहुकविदूसगे य सन्नायगाणुगए ॥ ६५ ॥
सड्ढियदुल्लहराए सरसइअंकोवसोहिए सुहए । मज्झे–रायसहं पविसिऊण लोयागमा मयं ॥ ६६ ॥
नामायरिएहिं समं करियं वियारं वियाररहिएहिं । वसइहिं निवासो साहूणं ठविओ ठाविओ अप्पा ॥ ६७ ॥

सं. ११७१ वर्षे लिखितां कविपल्हविरचितपट्टावल्याम्[1]—

उज्झाय तह वद्धमा खरतरवरलद्धउ । सुगुरुजिणेसरसूरि नियमि जिणचंदु संजमि ।

वि० सं० १२१०, १२२३, १२७७, वर्षेषु क्रमशः जन्माचार्यपदनिर्वाणभाजः जिनपतिसूरयः संघपट्टकवृत्तिप्रारंभे—

श्रीदुर्लभराजमहाराजसभायां अनल्पजल्पजलधिसमुच्छलदतुच्छविकल्पकल्लोलमालाकवलितबहलप्रतिवादिकोविदग्रामण्या संविग्नमुनिनिवहाग्रण्या सुविहितवसतिपथप्रथनरविणा वादिकेसरिणा श्रीजिनेश्वरसूरिणा श्रुतियुक्तिभिर्बहुधा चैत्यवासव्यवस्थापनं प्रति प्रतिक्षिप्तेष्वपि लाम्पट्याभिनिवेशाभ्याम् इत्यादि ।

सं. १२८५ श्रीपूर्णभद्रगणिविनिर्मिते धन्यशालिभद्रचरित्रप्रान्ते—

---

१ सं. ११७१ वर्षे श्रीजिनदत्तसूरीणां शिष्येण ब्रह्मचंद्रगणिना लिखिता ताडपत्रीयप्रतिकृतिः जेसलमीरदुर्गभाण्डागारे अद्याऽपि दृश्यते ।

श्रीमद्गुर्जरभूमिभूषणमणौ श्रीपत्तने पत्तने । श्रीमद्दुर्लभराजराजपुरतो यश्चैत्यवासिद्विपान् ॥
निर्लोड्यागमहेतुयुक्तिनखरैर्वासं गृहस्थालये । साधूनां समतिष्ठपन्मुनिमृगाधीशोऽप्रधृष्यः परैः ॥ १ ॥
सूरिः स चांद्रकुलमानसराजहंसः, श्रीमज्जिनेश्वर इति प्रथितः पृथिव्यां ।
जज्ञे लसच्चरणरागभृदिद्ध–शुद्धपक्षद्वयं शुभगतिं सुतरां दधानः ॥ २ ॥

सं० ११९३ वर्षे द्वादशकुलकविवरणे उपाध्यायः जिनपालः—

श्रीमच्चांद्रकुलांबरैकतरणेः श्रीवर्द्धमानप्रभोः, शिष्यः सूरिजिनेश्वरो मतिवचःप्रागल्भ्यवाचस्पतिः ।
आसीद्दुर्लभराजराजसदसि प्रख्यापितागारवद्–वेश्मात्रस्थितिरागमज्ञसुमुनिव्रातस्य शुद्धात्मनः ॥ १ ॥

सं. १२१७ वर्षे श्रावकधर्मप्रकरणवृत्तिप्रान्ते लक्ष्मीतिलकोपाध्यायः—

पादोषानपहस्त्यकुग्रहकृतान् सिद्धान्तदृष्ट्यावसत्यध्वानं शुभसिद्धिलग्नमभितः प्रामाणिकत्वं नयन् ।
स्थाने दुर्लभराजशक्रगुरुतां प्रापत्सुचन्द्रान्वयो–त्तंसः सूरिजिनेश्वरः समभवत् त्रैविद्यवंद्यक्रमः ॥ १ ॥

सं. १३३४ प्रभावकचरित्रे प्रभाचंद्र —

जिनेश्वरस्ततः सूरिरपरो बुद्धिसागरः । नामभ्यां विश्रुतौ पूज्यैः विहारेऽनुमतौ तदा ॥ ८२ ॥
श्रीमान् दुर्लभराजाख्यस्तत्र चासीद्विशांपतिः........ ॥ ४७ ॥
ततः प्रभृति संजज्ञे वसतीनां परंपरा.............. ॥ ८६ ॥

सं. १४१२ राजगृहगतपार्श्वनाथमंदिरप्रशस्तौ भुवनहितोपाध्यायः—

तदनु भुवनाश्रान्तख्यातावदातगुणोच्चरः सुचरणरमाभूरिः सूरिर्बभूव जिनेश्वरः ।

खरतर इति ख्यातिं यस्मादवाप गणोऽप्ययं परिमल कल्पश्रीष .. ..डुगणोऽवनौ ॥ १७ ॥

सं. १४९७ वर्षे जेसलमेरुदुर्गस्थसंभवजिनालयप्रशस्तौ, इतश्च चंद्रकुले श्रीखतरविधिपक्षे—

श्रीवर्धमानाभिधसूरिराजो जातः क्रमादर्बुदपर्वताग्रे ॥

मंत्रीश्वरश्रीविमलाभिधानः प्राचीकरद्यद्वचनेन चैत्यं ॥ १ ॥

अणहिल्लपाटकपुरे यैर्दुर्लभराजपर्षदि विवादे । प्राप्तं खरतरविरुदं जिनेश्वरार यो ज : ॥ २ ॥

सं. १५०१ वर्षे महोपाध्यायश्रीगुणरत्नगणिनिर्मिते षष्टिशतकप्रकरणवृत्तिप्रान्ते—

ततो गुरुर्जिनेश्वरः स्वरसतोऽपि संवेगवान्, बभूव विधिमार्गविच्च खरतरेत्यभिख्या यतः ।

प्रसिद्धिमगमत् मठाधिपतिसङ्घनिर्लोठना—न्नराधिपतिदुर्लभप्रथितपर्षदि प्रस्फुटम् ॥ २ ॥

सं. १५०३ तपागच्छनायकसोमधर्मगणिनिर्मितोपदेशसप्तत्याम्—

पुरा श्रीपत्तने राज्यं वाणे भीमभूपतौ । अभूवन् भूतलाख्याताः श्रीजिनेश्वरसूरयः ॥ २ ॥

सूरयोऽभयदेवाख्यास्तेषां पट्टे दिदीपिरे । तेभ्यः प्रतिष्ठामाप ो गच्छः खरतराभिधः ॥ ३ ॥

सं—१६९१ वर्षे श्री गुणविनयवा विरचिते सम्बोधसमितिवृत्तिप्रान्ते—

दुर्लभराजात् रतरबिरुदम श्रैर ।।सिनो जिर । विद श्र तिवासं जिने तेऽभवंस्तद ॥ ४ ॥

इत्यादिभिः प्रमाणैः वसतिवासः प्रकटितः श्रीजिनेश्वरसूरिणा, एवं खरतरबिरुदं सम्प्राप्तं च इति प्रकटं ज्ञायते.

अत्र खरतरगणपट्टावल्यादिषु सं० १०८० तमे वर्षे खरतरबिरुदं लिखितं तद् असहमानाः केचित् स्वकपोलकल्पितग्रन्थेषु सं० १०८० तमे वर्षे दुर्लभराजो नासीत्, स तु सं० १०६६ तमे वर्षे पत्तने राज्यं प्राप्य सं० १०७८ तमे वर्षे यात्रार्थं गतवान् तदा जिनेश्वरसूरिः दुर्लभराजसभायां कथं खरतरबिरुदं प्राप्तवान् इति प्रलपन्ति ऐतिह्यविदः, तत्प्रत्युत्तरमेवम्—

ननु प्रबंधचिंतामणि–विचारश्रेणि–रत्नमाला–रासमाला–राजस्थान–गूर्जरदेशीय–प्राचीनार्वाचीन–इतिहास–ग्रन्थेषु श्रीदुर्लभराजराज्यप्राप्ति. स्थितिकालश्च विषये वि. सं. १०६५–६६ तः ११–१२–१४ वर्षपर्यन्तं भिन्नमतानि दृश्यंते,[1]

ग्रन्थकारः स्वयमेवाह—' यथा श्रुतं संकलितप्रबन्धैः (प्र० चिं०) पाश्चात्यइतिहासग्रन्थकारस्तु अन्यग्रन्थान् अवलंब्य कथकडचारणादिमुखात् च यथा यथा श्रुतं तथा तथा अनुमीय ग्रथितं ग्रन्थम् एततूपरस्परविरोधभाजान् ग्रन्थान् च लंब्य सं० १०८० तमे वर्षे दुर्लभराजो नासीत् इति कथनं न युक्तम्, एषु परस्परलेखविरोधविषयेषु किं सत्यम् ? इति स्वयमेव विलोकनीयम् विचारशीलैः ।

---

१ ચાવડા વંશનો અનુક્રમ તથા તેની સાલવારી પ્રબંધ ચિંતામણીની જુદી જુદી પ્રતોમા બે રીતે મળે છે, અને વિચારશ્રેણીમા ત્રીજી યોજના છે. સમગ્રગ્રંથભાષામા વાક્ય રચનામા અવાંતર પ્રબોધની ગોઠવણુમા બધી રીતે શીથલ રચનાવાળો છે. અને પ્રબધ ચિંતામણીની હાથ પ્રતોની ગડબડ પાઠાંતરો કરતા પ્રક્ષિપ્તોએ ઉત્પન્ન કરેલી ગડબડથી આ બીજી રીતે ઘણા ઉપયોગી ગ્રંથનું ઐતિહાસિક મૂલ્ય કેટલેક અંશે ઘટી જાય છે. (તા –૨૯–૧–૩૩) ગુજરાતી પત્રમાથી પાનું ૧૭૩

श्रीदुर्लभराजजिनेश्वरसूरिविषये विविधग्रन्थादीन् समालोच्य प्रकटिते प्रमाणे तस्मिन् दोषाविष्करणं अस्मद्मतात् किंचिदपि विरुद्धकथनकरणं मत्सर एव केवल. न तु परमार्थः।

पुनरपि गच्छाम्नायानभिज्ञा जल्पंति जिनवल्लभसूरिजिनदत्तसूरिभ्यां खरतरगच्छः प्रवृत्तः इत्यादि, तत्तु असत्यं एव, जिनवल्लभसूरिसमये श्रीवर्द्धमानसूरित[1] खरतरगणकल्पद्रुमस्य श्रीमधुकरखरतर इति नामाङ्किता प्रथमा शाखा जाता। श्रीजिनदत्तसूरिसमये श्रीजिनशेखरसूरितः श्रीरुद्रपल्लीयेतिनामधेया द्वितीया शाखा अभूत्, इत्यलम् प्रपंचेन।

अथ षट्स्थानकप्रकरणस्य भाष्यकारः श्रीजिनेश्वरसूरिबुद्धिसागरसूर्योः शिष्यः अभदेवसूरिः स्वयमेव इत्थमाह प्रस्तुतप्रकरणभाष्यप्रान्ते—

मुणिपवरसिरिजिणेसरसूरीहि अणुग्गहट्ठाए। तप्पायपउमछप्पय मुणीससिरिअभयदेवसूरीहिं ॥ १ ॥
दुसमगममिच्छसुगमं विहियं नियसीसवयणेण ॥

उपाध्यायजिनपालोऽपि प्रस्तुतप्रकरणवृत्तिप्रारंभे—

सत्यपि गम्भीरार्थे, भाष्येऽभयदेवसूरिभिर्ग्रथिते। प्रतिपदमर्थाख्यानान्मम यत्नः सफल एवात्र ॥ ३ ॥

इत्यनेन श्रीअभयदेवसूरिणा एव भाष्यं कृतं इति ज्ञायते।

अथ अस्य प्रकरणस्य वृत्तिप्रणेता जिनपतिसूरिशिष्यः जिनपाल[1] उपाध्यायः स्वयमेव इत्थं आह—प्रस्तुतप्रकरणवृत्तिप्रान्ते—जिनपति-

१ एतन्महाशयाना परिचयो अपभ्रंशकाव्यत्रयीभूमिकायां विलोकनीय. जिज्ञासुभिः ॥

रितिसूरिःसद्गुणागाढवंधैर्निविडनिगडिते वाऽस्त्येति नो संयमश्री....॥ ६ ॥ तच्छिष्यो जिनपालः षट्स्थानकसंज्ञितप्रकरणस्य । वृत्तिं व्यदधायेव अप्येतां......॥ ८ ॥ युग—रसदिनकर (१२६२) संख्ये विक्रम.......॥ १० ॥

एतैः वाक्यैः श्रीजिनपालपाठकपुङ्गवेन जिनपतिसूरेः शिष्यत्वं स्वसत्तासमयश्च प्रतिपादितः स्पष्टतया अपरं च—चर्चरी—द्वादश-कुलक—उपदेशरसायणादिग्रन्थाना वृत्तिः चक्रे ।

श्रीमद्जिनकृपाचंद्रसूरीश्वराः स्वशिष्यप्रशिष्यैः परिवृता: वि. सं. १९८३ तमे वर्षे जेसलमेरदुर्गे चातुर्मासस्थितिं कृतवन्तः, तदानीं श्रीजिनभद्रसूरिसंस्थापितज्ञानभाण्डागारे स्थितानां अतिजीर्णताडपत्रलिखितपुस्तकानां प्रतिकृतयः कारिताः सूरिभिः, तदा श्रीप्रवर्तक-सुखसागरमहाराजोऽपि तद्ग्रन्थसंशोधनकार्ये कुर्वाणः कारयमाणश्च कतिपयान् अमुद्रितदुर्लभांश्च ग्रन्थान्—षट्स्थानक—द्वादशकुलक-धन्यशालिभद्रचरित्रादीनां मुद्रयितुम् (मुद्रणयन्त्रविषयीकर्तुम्) इच्छया प्रूफसंज्ञकाः प्रतिकृतयः कारिताः अधुना तु श्रीजिनकृपा-चन्द्रसूरीश्वराणां उपदेशेन वंगालदेशभूभामिनीभालभूषणकालिकातामहानगरीवास्तव्यस्य धर्मज्ञश्रेष्ठिकनैयालाल—वडेरस्य धर्म-पत्नी श्राविका छोटीबाइ इतिनामिका स्वकीयज्ञानावरणकर्मक्षयोपशमनाय परोपकाराय च एतत्प्रकरणरत्नमुद्रणे द्रव्यसाहाय्यं कृतवती तस्मात् सा धन्या, पठनपाठनादिरूपेण साफल्यं विदधतु सज्जना अपि इति प्रार्थयेयम् ।

प्रस्तुतप्रकरणरत्नस्य संशोधनावसरे प्राचीनार्वाचीनानि एतानि हस्तलिखितानि पुस्तकानि समुपलब्धानि—

प्रथमं अणहिल्लपुरपत्तनस्थभाण्डागारतः श्रीप्रवर्त्तकपदालंकृतश्रीकांतिविजयमहाराजशिष्यमुनिपुङ्गवचतुरविजयशिष्यपुन्यविजय-मुनिवर्याणां अनुपमकृपातः संप्राप्तं प्राचीनं अष्टाविंशतिपत्रात्मकम्, द्वितीयम् वर्धमानकेम्प (वढवाणकेम्प) स्थितयोगनिष्ट-

पन्यासश्रीकेसरविजयदेवविजयपुस्तकालयतः महोपाध्यायदेवविजयमहाराजैः आनाय्य प्रदत्तं अर्वाचीनं एकचत्वारिंशत्पत्रात्मकम्, तृतीयं अत्रैव श्रेष्ठिआणंदजिकल्याणजिपेढिस्थज्ञानभांडागारतः संप्राप्तं षड्विंशतिपत्रात्मकं श्रीमत्कुंवरजिसाहाय्येन, एतत् प्रकरणभाष्यपुस्तकं तु वटपद्रस्थ (वडोदरास्थ) आचार्य श्रीमोहनसूरिज्ञानभाण्डागारतः उपाध्यायश्रीप्रतापविजयमहाराजैः आनाय्य प्रदत्तं नूतनं चतुष्पत्रात्मकम्।

एतत् पुस्तकत्रयेण संशोधनकर्मणि महत् साहाय्यं जातम् ततस्तेषां पुस्तकसाहाय्यकारकाणां महाशयानां भूरिभूरिधन्यवादप्रदानपुरस्सरं महतीं उपकृतिं स्मृतिपथं नयामः।

श्रीहेमचन्द्राचार्यपाठशालाध्यापकेन पण्डितअमृतलालमहाशयेन वीरबाईजैनपुस्तकालयकार्यवाहकश्रीमत्पदमसीहीरजीनामधेयेन च प्रस्तावनालेखविषये अनेकपुस्तकावलोकनसाहाय्यं प्रदत्तं ताभ्यां कल्याणं वाञ्छामि,

पुस्तकावलंबनेन विद्वद्वर्यप्रवर्त्तकसुखसागरमहाराजेन सावधानमनसाऽतिपरिश्रमेण संशोधितेऽप्यस्मिन् ग्रन्थे दृष्टिदोषवशात् अक्षरयोजकदोषाद्वा यत्र कुत्रचिदशुद्धयः भवेयुः तत्र कृपां विधाय संशोधनीयम् क्षन्तव्यं क्षमाधनैश्च विद्वद्गुणानुरक्तैः इति प्रार्थयते—

श्रीखरतरगणावतंसकअनेकज्ञानभण्डारधार्मिकविद्यालयोत्पादकश्रीजिनकृपाचन्द्रसूरीश्वरचरणारविंदमधुकरशिष्यरत्नप्रवर्त्तकमुनिसुखसागरमहाराजानां शिष्यः सज्जनकृपाकाङ्क्षी—मंगलसागरो मुनिः ॥ वि. सं. १९९० वर्षे अक्षयतृतीयादिने पादलिप्तपुरे

१ किन्तु अस्य भाष्यग्रन्थस्य एका प्रति मिलिता सापि अशुद्धप्रायत्वात् अस्माभिः न मुद्रापिता

॥ अर्हम् ॥

दुर्लभराजसदसीप्राप्तखरतरबिरुद–वसतिमार्गप्रकाशक–श्रीमज्जिनेश्वरसूरिविरचितम्–

षट्स्थानकप्रकरणम् ।

श्रीमज्जिनपतिसूरिशिष्य–प्रवरपण्डित–श्रीमज्जिनपालविवृतवृत्त्युपेतम्

धर्मोपदेशनविधौ रदनोत्थकान्तिः, सान्द्रोद्यती जनतनूर्विशदीचकार ।
अन्तर्विशुद्धिकरगीर्विजिगी*षयेव, यस्य श्रियं जिनपतिस्तनुतात्स वीरः ॥ १ ॥

श्रीमत्सूरिजिनेश्वरेण रचिते षट्स्थानके स्थानके, मुक्तिप्रस्थितभव्यपान्थनिवहस्याऽव्यवस्थाकृतिः ।
वृत्तिर्मन्दधिया मया प्रकरणे प्रारभ्यतेऽत्रादरात् , संक्षिप्ता सुगुरोरुपासनविधेः प्राप्तार्थलेशस्पृशा ॥२॥

* जिगीषयैव इति प्रत्यन्तरे ।

त्यपि गम्भीरार्थे, ाष्येऽभयदेवसूरिभिर्ग्रथिते। तिपदम ख्या ान्मम यत्नः ष्वा ॥३॥

इह हि जगति प्रवरप्रभापटलप्रद्योतितदिक्चक्रवालप्रभावातिशायिरत्नराजि रत्नाकर इव विराजितत्रिजगदुदरान्तर्वर्त्ति-पदार्थसार्थव्यवस्थापकप्रमाणोपपन्नस्याद्वादमतकोविदसंविग्नमहामुनिजनसंकुलेऽपि शुक्तिशकलासारप्रामाणिकनानाकुनयदेश-काखण्डपाखण्डिमण्डलवचःप्रपञ्चकदर्थ्यमानमानसानां प्रायः प्राणिनां निःस्वानामिव तथाविधप्रवरपुण्यपरंपरापरिपाकवि-ानां न भवत्येव सप्रभावा प्रयत्नरत्नैरिव स्याद्वादकोविदसंविग्नैः सद्गुरुभिः सह संपादितातिदारुणभवदारिद्र्योपद्रव-विप्रयोगः संप्रयोगः। स हि विध्वंसकः कापथौघानां, मत्तमतङ्गजः संसारगतिवल्लीनां, सुधारससंसिक्तकल्पकन्दः सकल-कल्याणफलपरंपराणाम्। तदुक्तम्—"[1]जायइ सुह रुजोगो, सहसा सिवलच्छिपत्थियाण धुवं। पावंति जं अधन्ना, न कयावि मणिच्छियं अमयं ॥ १ ॥" त भमन्तरेण तु भवचक्रभ्रमणमव संपद्यते। यदुक्तम्—"[2]धम्मायरिएण विणा, अलहंता सिद्धिसाहणोवायं। अरय व्व तुंबलग्गा, भमंति संसारचक्कम्मि ॥१॥" चित्कथंचित्तथाविधभव्यतापरिपाकयोगात् संजा-तेऽपि तस्मिन् भव्यप्राणि मसदुपदेशविषप्रदानेन विफलीक्रियमाणे दुर्वारनिष्कारणवैरिणेव पाखण्डिमण्डलेन भगवान् परमकरुणारसपाथोनिधिः कापथशतसंतमसतरुणतरतेजोनिधिर्गूर्जरधराधीशश्रीमद्दुर्लभराजसमक्षं विपक्षविक्षेपपुरस्सरं च

१ जायते शुभगुरुयोगः, सहसा शिवलक्ष्मीप्रस्थितानां ध्रुवम्। प्राप्नुवन्ति यदधन्याः, न कदापि मनइच्छितम् अमृतम् ॥
२ धर्माचार्येण विना, अलभमानाः सिद्धिसाधनोपायम्। अरका इव तुम्बलग्ना, भ्रमन्ति संसारचक्रे ॥

व्यवस्थापितसुविहितजनगृहिसदननिवासः प्रमोदितसंविग्नमुनिजनमनःकुमुदखण्डः प्रवचनमहाप्रासादशिखरोन्नतकनककेतुदण्डः सत्तर्कागमादिसमस्तविद्यावदातबोधरञ्जितसकलकोविदवरः शिवपथप्रस्थितसंविग्नमुनिजनाग्रेसरः सर्वप्रकारपरित्यक्तभूरिः श्रीमज्जिनेश्वरसूरिर्भव्यप्राणिगणोपचिकीर्षया निखिलशाक्यभौतादिपाखण्डिमण्डलाभिमतकुदेवकुगुरुकुधर्ममार्गखण्डनं प्रमाणोपपन्नसर्वज्ञसद्गुरुसद्धर्ममार्गस्वरूपप्रतिपादनमण्डनं पूर्वयुगप्रवरागमविरचितातिगम्भीरार्थगाथायुगलकविवरणरूपमिदं षट्स्थानकाख्यं श्रावकवक्तव्यतापरनामकं प्रकरणं चकार। तत्र चादावेव तावदेतत्प्रकरणमहापुरप्रवेशद्वारभूतं गाथायुगलकमुपन्यस्यति स्म—

कयवयकम्मयभावो[1], सीलत्तं[2] चेव तह य गुणवत्तं[3]। रिउमइववहरणं[4] चिय, गुरुसुस्सूसा[5] य बोद्धव्वा १
पवयणकोसल्लं[6] पुण, छट्ठं ठाणं तु होइ नायव्वं। छट्ठाणगुणेहिं जुत्रो, उक्कोसो सावत्रो होइ २

अस्य व्याख्या—व्रतानि–नियमाः, तानि चात्र स्थूलप्राणातिपातविरमणादीनि, तान्येव कर्म–परिकर्म पूर्वसेवा इत्यर्थः। तच्चार्थादेव यतिधर्मस्य। अथवा व्रतानि–सर्वथा प्राणातिपातविरमणादीनि, तेषां कर्म–परिशीलनमणुव्रतादिपालनरूपपूर्वसेवालक्षणम्। ततः कृतं विहितं व्रतपरिकर्म–महाव्रतप्रतिपत्तिहेतूनामभ्यासो येन स तथोक्तः, स एव कृतव्रतकर्मकः, तस्य भावस्तत्त्वम्। शब्दस्य हि प्रवृत्तिनिमित्तं भावो यथा वृक्षस्य वृक्षत्वम्। तथा च येन निमित्तेनाणुव्रतप्रतिपत्त्यादिना श्राद्धः कृतव्रतकर्माऽभिधीयते स कृतव्रतकर्मकभावः। अथवा व्रतानि–अणुव्रतादीनि, तेषां परिशीलनं मार्गश्रवणज्ञानादिरूपम्।

अयमभिप्रायः,–यथा मन्त्रादिसिद्धये मान्त्रिकेण पूर्वं चिस्थानपथ्याशनब्रह्मचर्यादिकमभ्यस्यते, तथा श्राद्धेनापि देशवि-
रतेन भावतः सर्वविरत्यर्थिना पूर्वमणुव्रतादीनि निरतिचाराण्य पालनीयानि । अविरतेन तु देशविरत्यर्थिना श्रवणादीन्ये-
वाभ्यसनीयानीति १॥ तथा शीलं–सच्चरितं तच्चायतनसेवादिरूपम् । ततः शीलवत्त्वं–सदाचारवत्त्वं, प्राकृतत्वाद्वकारलोपः ।
'चः' समुच्चये । 'एव' इत्यवधारणे । तेन शीलवत्त्वमेवैकं श्राद्धस्य विशिष्टत्वमभिव्यनक्तीति । न चैतावता कृतव्रतकर्मत्वा-
दीनां तदनभिव्यञ्जनकत्वप्रसक्तिः, शीलवत्त्ववत् तेषामप्येकैकशस्तदभिव्यञ्जनकत्वादिति भावः । एवमग्रेऽपि यथासंभवं
वाच्यम् २ ॥ 'तह य गुणवत्तं' इति । 'तथा च' इत्यपि समुच्चये । "यावन्ति समुच्चये पदानि तावन्ति समुच्चय-
पदानि" इति न्यायेन न पौनरुक्त्यशङ्कावकाशः । स्वात्मन्यतिशयविशेषोत्पादका धर्मा गुणाः, ते च तत्त्वतः
सम्यग्दर्शनादयः, तद्यु त्वं गणवत्त्वं–सूत्ररुच्यादिमत्त्वमित्यर्थः ३ ॥ तथा जुः–अकुटिला मतिः–बुद्धिस्तया व्यव-
हरणं–वृत्त्यर्थं व्यापरणं ऋजुमतिव्यवहरणं वचनाविसंवादादिरूपम् । 'चिय' इत्यवधारणे, स च शीलवत्त्वमेवे-
तिवद्भावनीयः ४ ॥ तथा गुरूणां–लोके लोकोत्तरे च गौरवार्हाणामाचार्यमातृपित्रादीनां (शुश्रूषा–) अभिमुख-
गमनादिप्रतिपत्तिलक्षणा सेवा गुरु श्रूषा । सा च 'बोद्धव्या' ज्ञातव्या श्रावकस्य स्थानत्वेन । षष्ठस्थानोद्देश-
पर्यन्तवर्तिज्ञातव्यपदादेव तत्तद्विशेष्यलिङ्गानुसारेण सर्वस्थानसंबन्धाद् गुरु श्रूषास्थानसंबन्धे लब्धेऽपि यदत्र बोद्धव्य-
पदोपादानं तत् समस्तस्थानानां गुरु श्रूषा ध्यत्वेन तस्याः सर्वोत्कृष्टत्वतो विशेषेण ज्ञातव्यताज्ञापनार्थमित्यर्थः ५
॥ १ ॥ 'प्रवचन शलमेव' जिन सननैपुणमेव । 'पुनः' शब्दः पूर्वस्माद्विशेषणार्थः । षष्ठं स्थानं त्विति, तिष्ठति

श्रावकोऽस्मिन्नवहितमनस्कतया वर्त्तत इति स्थानं श्रावकस्य विशिष्टत्वाभिव्यञ्जक आचारविशेषः ॥ ६ ॥ 'तुः'
एवकारार्थः, स च योजित एव । 'भवति' वर्त्तते 'बोद्धव्यं' ज्ञातव्यम् । ततश्चैतैः 'षट्स्थानगुणैः' षट्संख्यश्रा-
वकानुष्ठानविशेषैः 'युक्तः' संगतः, उत्कृष्यते शेषेभ्य इत्युत्कर्षः–उत्कृष्ट इत्यर्थः, 'श्रावकः' तत्त्वतो यथावस्थितभगव-
द्वचनश्रोता 'भवति' संपद्यते । शेषास्तु नाममात्रेणैव । इति द्वारगाथायुगलकार्थः ॥ २ ॥

अथैषां स्थानानां किमर्थमेवं क्रमेणोपन्यासः ? उच्यते—सर्वेषां परस्परतो हेतुहेतुमद्भावादेवमेव सिद्धेः । तथाहि–
समस्तशेषस्थानसाध्यत्वेन श्रावकत्वपदव्याश्च परमप्रकर्षरूपत्वेन मूर्द्धाभिषिक्ततया व्रतपरिकर्मण आदावुपन्यासः । यतः—
"न विणा परिकम्मेणं, सम्मं संभवइ कज्जसंसिद्धी ॥ परमा परमपयफला, सुमंतिणो मंतसिद्धि व्व ॥ १ ॥" तदनन्तरं
तस्यैवाऽऽद्यकारणभूतस्य शीलवत्त्वस्य । यतः—"सीलं हि सयायारो, सामन्नेणावि जस्स सो नत्थि । अइबालो व्व कहं
सो, सावगधम्मस्स जोगो त्ति ॥ १ ॥" ततोऽपि शीलप्रधानकार्यभूतस्य गुणवत्त्वस्य । यतः–"सीलेण वि किं तेणं,
संकासेणं तु कासकुसुमस्स । जत्तो वरगुणवत्तं, रमणिज्जफलं न संपन्नं ॥ १ ॥" गुणवत्त्वोपन्यासोत्तरकालं तु सामान्यतो

---

१ "श्रावक वि" इति प्रत्यन्तरे ॥ २ न विना परिकर्मणा, सम्यक् संभवति कार्यसंसिद्धिः । परमा परमपदफला, सुमन्त्रिणो
मन्त्रसिद्धिरिव ॥ ३ शीलं हि सदाचारः, सामान्येनापि यस्य स नास्ति । अतिबाल इव कथं स, श्रावकधर्मस्य योग्य इति ॥
४ शीलेनापि किं तेन, संकाशेन तु काशकुसुमस्य । यतो वरगुणवत्त्वं, रमणीयफलं न संपन्नम् ॥

गुणवरत्वकार्यभूतस्य ऋजुमतिव्यवहरणस्य । यतः—" रिउववहरणं जीए, संपाडिज्जइ प संसिया सा उ । सग्गुणलच्छी विउला, जलनिहिवेल व्व विलसंती ॥ १ ॥ " तदनन्तरं ऋजुमतिव्यवहरणस्यैव प्र नकारणभूताया गुरुशुश्रूषायाः । यतः—" परम स्स वि हेऊ, गुरुसुस्सू पवड्ढिया निय । कप्पलय व्व समुज्जुय–ववहरणस्स उ किमिह चुज्जं ॥ १ ॥" ततोऽपि तस्या एव प्रधानकार्यभूतस्य प्रवचनकौशलस्य । यतः—" कहँ पवयणकोसल्लं, तेसिं संभवइ नणु जडाणं च । जेसिं गुरुसुस्सूसा, नाभिमुही भारइ व्व सया ॥ १ ॥ " तदेषामेवं क्रमोपन्यासे तात्पर्यम् । तत्रापि व्रतपरिकर्मणि यत् पूर्वं श्रवणस्याभिधानं तत् श्रवणस्यैव सर्वस्य मूलत्वख्यापनार्थम् । च—" सुच्चा णइ कल्लाणं, सुच्चा जाणइ पावयं । उभयं पि जाणई सोच्चा, जं सेयं तं ायरे ॥ ॥ " न तथापि किमेतत्स्थानषट्कयुक्तस्यैव श्रावकता ? उत श्रावकस्य : षट्स्थानयोगः ? न वदाद्यः, तद्विकलस्यापि ले श्रा त्वश्रवणात् । तदुक्तम्—"धम्मरयणस्स जोग्गो, अक्खुद्दो १

१ ऋजुव्यवहरणं यया, संपाद्यते प्रशंसिता सा तु । सद्गुणलक्ष्मीर्विपुला, जलनिधिवेलेव विलसन्ती ॥ २ परमफलस्यापि हेतु–र्गुरुशुश्रूषा प्रवर्धिता नियमात् । कल्पलतेव समृजुक–व्यवहरणस्य तु किमिहाश्चर्यम् ॥ ३ कथं प्रवचनकौशल्यं, तेषां संभवति ननु जडानां च । येषां गुरुशुश्रूषा, नाभिमुखी भारतीव सदा ॥ ४ श्रुत्वा जानाति कल्याणं, श्रुत्वा जानाति पापकम् । उभयमपि जानाति श्रुत्वा, यत् श्रेयस्तत् समाचरेत् ॥ ५ धर्मरत्नस्य योग्योऽक्षुद्रो रूपवान् प्रकृतिसौम्यः । लोकप्रियो ूरो, भीरुरशठः सदाक्षिण्यः ॥

रूववं २ पगइसोमो ३ । लोयप्पिओ ४ अकूरो ५, भीरू ६ असढो ७ सदक्खिणो ८ ॥ १ ॥ लज्जालुओ ९ दयालू १०, मज्झत्थो सोमदिट्ठि ११ गुणरागी १२ । सक्कह १३ सपक्खजुत्तो १४, सुदीहदंसी १५ विसेसन्नू १६ ॥ २ ॥ वुड्ढाणुगो १७ विणीओ १८, कयन्नुओ १९ परहियत्थकारी य २० । तह चेव लद्धलक्खो २१, इगवीसगुणो हवइ सड्ढो ॥ ३ ॥" नापि द्वितीयः । यदा हि प्रागेव श्रावकत्वमस्ति तदा किमनर्थकेन षट्स्थानयोगेन ?। किञ्च—'छट्ठाणगुणेहिं' इत्यादिना विरुद्धाभिधानेन ?, इति चेत्, नैवम्, सामान्यविशेषभावेनोभयस्याप्युपपत्तेः। तथाहि—यत् शास्त्रे स्थानयोगमन्तरेणापि श्रावकत्वं श्रूयते तत् सामान्येन विशिष्टश्रावकत्वयोग्यतामाश्रित्येत्यवगन्तव्यम्, अत एव तत्र 'धम्मरयणस्स जोग्गो' इत्युक्तम्। षट्स्थानयोगे तूत्कृष्टश्रावकता, अत एव तत्र, 'उक्कोसो सावगो होइ' इति प्रत्यपादि । तदुद्देशेन च—"संपत्तदंसणाई, पइदियहं जइजणा सुणेई य । सामायारिं परमं, जो खलु तं सावगं बिंति ॥ १ ॥" इत्यादि शास्त्रम् । शेषं त्वपुनर्बन्धकाद्यवस्थावर्तिस्वरूपाभिधानपरमिति व्यवसेयम् । अपुनर्बन्धकाद्यवस्थायां हि प्रणश्यतीव प्रबलतरमिथ्याभिनिवेशपिशाचः, समुन्मिषतीव प्रभाकराकारः सद्बोधः, समुल्लसन्तीव धर्मशुश्रूषाद्यङ्कुरकोट्य इत्यलमतिप्रसङ्गेन । प्रकरणादौ नमस्कारानुपन्यासचर्चाप्यत एव न क्रियत इति प्रस्तुतमारभ्यते ।

---

१ लज्जालुको दयालु–र्मध्यस्थः सौम्यदृष्टिर्गुणरागी । सत्कथः सपक्षयुक्तः, सुदीर्घदर्शी विशेषज्ञः ॥ २ वृद्धानुगो विनीतः, कृतज्ञकः परहितार्थकारी च । तथा चैव लब्धलक्ष्य, एकविंशतिगुणो भवति श्राद्धः ॥ ३ संप्राप्तदर्शनादिः, प्रतिदिवसं यतिजनात् शृणोति च । सामाचारीं परमां, यः खलु तं श्रावकं ब्रुवते ॥

अथ प्रकरणावतारायाह—अत्र व्याख्येति।

'अत्र' अस्मिन् गाथाद्वये विशिष्टा– संक्षिप्तनिःशेषाभिधेयविषयत्वेन प्रधाना आख्या–भणितिर्व्याख्या। अथवा 'अत्र' अस्मिन् गाथाऽभिधेये स्थानषट्के विविधा–चतुष्टा(ष्टया)दिभेदाभिधानेन नानाप्रकारा आख्या व्याख्या क्रियत इत्यध्याहारः। 'इति' प्रकरणावतारावान्तरवाक्यार्थः॥

साम्प्रतं व्रतपरिकर्मणो भेदोद्देशपुरस्सरं तत्प्रथमभेदं श्रवणं प्रतिपादयन् यादृशाद्गुरोर्यादृशेन च यत् कर्तव्यं तदाह—

वयपरिकम्मत्तं, चउव्विहं ु इ ाव पढ ं तु। गुरुणो गी र ाओ, वि ए अ ग्गहपरो ॥३॥

व्याख्या—'कृतव्रतपरिकर्मत्वं' पूर्वो शब्दार्थ तत् 'चतुर्विधं' चतुष्प्रकारम्। तदुक्तम्—"कयवयपरिकम्मत्तं, चउव्विहं सुणइ जाणइ तहेव। इच्छइ गिण्हइ तत्थ य, सुणेइ जं जह य तं वुच्छं ॥१॥" 'शृणोत्येव' आकर्णयत्येव, तावदित्यु मे। 'प्रथमं' पूर्वं ज्ञानेच्छाग्रहणेभ्यः। तुरेवकारार्थो योजित एव। ' रोः' ज्ञानादि गुणगणोपेततया सच्छा ोपदेशकतया च गौरवार्हस्याचार्यादेः सकाशात्। तदुक्तम्—" धर्मं तीर्थकृतां यथैव गदितं तत्त्वं तथैवानिशं, यो जानाति करोति चाऽऽदिशति चाऽसङ्गः स दिव्यो गुरुः। तस्योपा मपास्तकल्मषभरां भक्त्या गृहस्थैर्दृढं, कुर्वद्भिः परमोपदेशमिषतः किं किं फ

१ व्रतपरिकर्मत्वं, चतुर्विधं शृणोति जानाति तथैव। इच्छति गृह्णाति तत्र च, शृणोति यद् यथा च तद् वक्ष्ये॥

॥ ॥

नाप्यते ? ॥ १ ॥ ” कीदृशाद्गुरोः ? ‘ गीतार्थात् ’ सम्यक्प्रवृत्तिहेतुसूत्रार्थविदः । तदुक्तम्—“ गीयं भन्नइ सुत्तं, अत्थो तस्सेव होइ वक्खाणं । गीयस्स य अत्थस्स य, संजोगा बिंति गीयत्थं ॥ १ ॥ ” अनेन चासाधारणविशेषणोपादानेन समस्ततद्गुणोपसंग्रहः सूच्यते । तादृशस्यैव शुद्धधर्मप्ररूपकत्वाधिकारित्वात् । तदुक्तम्—“ देसकुलजाइरूवी, संघयणी धिइ-जुओ अणासंसी । अविकत्थणो अमाई, थिरपरिवाडी गहियवक्को ॥ १ ॥ जियपरिसो जियनिद्दो, मज्झत्थो देसकालभावन्नू । आसन्नलद्धपइभो, णाणाविहदेसभासन्नू ॥२॥ पंचविहे, आयारे, जुत्तो सुत्तत्थतदुभयविहन्नू । आहरणहेउकारण-नय निउणो गाहणाकुसलो ॥ ३ ॥ ससमयपरसमयविऊ, गम्भीरो दित्तिमं सिवो सोमो । गुणसयकलिओ जुग्गो, पवयणसारं परिकहेउं ॥ ४ ॥ ” साम्प्रतं हि देवादिस्वरूपस्यापि गुरूपदेशमन्तरेण दुर्ज्ञेयत्वात् परीक्ष्य धर्मार्थिना विशेषविद् गुणगणोपेत एव सद्गुरुरङ्गीकार्य इति विशेषतस्तद्गुणोपवर्णनम् । अनेन च सद्गुरुस्वरूपाभिधानेन पाखण्डिमण्डलाभिमतगुरूणां

---

१ गीतं भण्यते सूत्रम्, अर्थस्तस्यैव भवति व्याख्यानम् । गीतस्य चार्थस्य च, संयोगाद् ब्रुवते गीतार्थम् ॥ २ देशकुलजाति रूपी, संहननी धृतियुतो ।शंसी । अविकत्थनो यी, स्थिरपरिपाटिर्गृहीतवाक्यः ॥ ३ जितपरिषद् जितनिद्रो, मध्यस्थो देशकालभावज्ञः । आसन्नलब्धप्रतिभो, नानाविधदेशभाषाज्ञः ॥ ४ पञ्चविधे आचारे, युक्तः सूत्रार्थतदुभयविध(धि)ज्ञः । आहरणहेतुकारणनयनिपुणो ग्राहणाकुशलः ॥ ५ स्वसमयपरसमयविद्, गंभीरो दीप्तिमान् शिवः सौम्यः । गुणशत लितो योग्यः, चनसारं परिकथयितुम् ॥

ज्ञानमद्दा दिविकल ामगुरुत्वमर्थादुक्तं भवति। तदुक्तम्—"सर्वाभि पिणः सर्व—भोजिनः सपरिग्रहाः। अब्रह्मचारिणो मिथ्योपदे । गुरवो न तु ॥ १ ॥" कथं शृणोति ? इत्याह 'विनयेन' नम्रत्वमनःप्रसादाञ्जलिप्रग्रहादिप्रतिपत्तिलक्षणो विनयस्तेन करणभूतेन । 'अ ग्रहपरः' इति, उ ारनि : ' गृहीतोऽस्मि' इति मन्यमान इ र्थः। अनेन च तस्यार्थित्वं दर्शितं भवति। तदुक्तम्--"अत्थी उ जो विणीओ" इत्यादि। 'च' अनुक्तसमुच्चये। तेन स र्थ्यन्नत्रा-प्रतिकुष्टर क्षणमपि रूपद्वयम सिद्धं तस्य समुचितं भवति। तत्त्वतस्तादृशस्यैव तथाश्रवणोपपत्तेः। इति थार्थः ॥३॥

अथ प्रश्नपूर्वकं श्रोतव्यवस्तुतत्त्वमुपदिशन् श्रवणविधिमाह—

को देवो को धम्मो, ो याराहणे त्ति। गीयत्थ पायमूले, ुणेइ विगहाइपरिमुक्को ॥ ॥

व्याख्या—'कः' किंलक्षणः 'देवः' क्रादीनामपि स्तोतव्यतयाऽऽराध्यतमः। कः 'धर्मः' दुर्गतिगर्तनिपतज्जन्तु-जातधारणप्रवणः परिणामस्तत्पूर्वकमनुष्ठानं च। को 'तदाराधनोपायः' देवप्रसादनविधिः। वा द्धः समुच्चये। ह्रस्वत्वं प्र तत्वात्। "यस्य येनार्थसंबन्धो दूरस्थस्यापि तस्य सः" इति न्यायाद् व्यवहितस्यापि देवस्य तच्छब्देन परामर्शः। इतिशब्दः प्रष्टव्यवस्तुसमाप्त्यर्थः। एतत् सर्वं 'गीतार्थपादमूले' पूर्वोपदर्शितस्व ाचार्यादिसमीपे। अत्र च पुनर्गीतार्थ-ग्रहणं चित्कदाचि रोरभावे सा न्यसाध्वादेरपि गीतार्थस ात् श्रोतव्यमिति ज्ञापनार्थम्, लादिदोषात् शेषसम-प्रगुणाभावेऽपि व्याख्यातुर्गीतार्थत्वस्याभ्यर्हितत्वेन सर्वाधि रित्वसमर्थत्वात्। 'शृणोति' कर्णयति 'विकथादिपरिमुक्तः'

स्त्र्यादिविरुद्धकथाविकलः, धर्मकथाप्रस्तावे शेषकथायाः सर्वस्या एव विकथात्वात् । तदुक्तम्—“ इत्थिकहा भत्तकहा, रायकहा चोरजणवयकहा य । नडनट्टजल्लमल्लिय, सा विकहा देसिया समए ॥ १ ॥ ” अत्र च ‘ जल्ल त्ति ’ वरत्राखेलका; ‘मल्लियत्ति’ मल्लाः । आदिशब्दान्निद्रादित्यागग्रहः । तत्त्यागाच्च शेषसमस्तश्रवणविधिपरिग्रहः । तदुक्तम्—“ निद्दाविगहापरिव–ज्जिएहिं गुत्तेहिं पंजलिउडेहिं । छन्दमणुयत्तमाणेहिं, उवउत्तेहिं सुणेयव्वं ॥ १ ॥ ” इति गाथार्थः ॥ ४ ॥

अथाद्यप्रश्नस्य रागादिभी रहित एव देव इत्युत्तरमभिधित्सुस्तेषामनर्थहेतुत्वं तद्वतां चानर्थसंपत्तिं तावदाह—

रागो दोसो मोहो, तिन्नि वि संसारकारणं एए । रागंधा जमणत्थं, लहंति न तरामि तं भणिउं ॥५॥

व्याख्या—‘रागः’ अभिष्वङ्गलक्षणः, ‘द्वेषमोहौ’ वक्ष्यमाणलक्षणौ । एते त्रयोऽपि, न त्वेतेष्वेकतम एवेत्यपिशब्दार्थः । ‘ संसारकारणं ’ भवनिबन्धनं भवन्ति । अतः कथं तद्वान् देवो भवति ? तस्य वीतरागतया सर्वज्ञत्वेनाभिमतत्वादित्यभिसन्धिः । अथैतेषु मध्यात् प्रथमं तावद् रागविशेषस्य कामस्यैव चेष्टितं फलं चोपदिदर्शयिषुस्तत्फलस्य वचनागोचरत्वमाह—‘ रागान्धाः ’ कामान्धाः ‘ जं ’ इति यं कञ्चनानिर्वाच्यस्वरूपम् ‘ अनर्थं ’ व्यसनम्—इह हि लोके निरन्तरार्तध्यानक्षयव्याध्यादिकं परलोके तु नरकादौ तप्तायोमययोषिदालिङ्गनादिकमतिदुःसहं ‘ लभन्ते ’ प्राप्नुवन्ति । ‘तं’ अनर्थं ‘ न तरामि ’

१ स्त्रीकथा भक्तकथा, राजकथा चौरजनपदकथा च । नटनाट्यजल्लमल्लाः, सा विकथा देशिता समये ॥ २ निद्राविकथापरिवर्जितैर्गुप्तैः प्राञ्जलिपुटैः । छन्दमनुवर्त्तमानै–रुपयुक्तैः श्रोतव्यम् ।

न नोम्यहमिति ' थि ' ' म , तिप्रचुरत स्य इति गाथार्थः ॥ ५ ॥

त ष्टि —

हीलिंति धम्मि , निंदिं विंति । चाडूणि इत्थिवग्गे, करिंति पाएसु निवडंता ॥६॥

व्याख्या—'हीलयन्ति' तदनुष्ठानतिरस्कारेणावमानयन्ति 'धर्मिवर्गं' धार्मिकजनसमूहं, लौकिकधर्ममात्रप्रवृत्तमपि, किं लोकोत्तरिककेशोल्लु ब्रह्मचर्यादिदुष्करा नप्रवृत्तम् । तथा च तत्प्रलापाः—"स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसंपत्करीं, ये मूढाः प्रविहाय यान्ति धियो मिथ्याफल क्षिणः । ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः, केचित् प शिखी श्च जटिलाः पालिका परे ॥१॥" तथा ' र्गं' तपःसंयमादिलक्षणं मोक्षपथं 'निन्दन्ति' भाषन्ते । तथा चाहुः—"तपांसि यात श्चित्राः, संयमो भोगव ना ।" इति । त 'ब्रुवते' प्ररूपयन्ति पुरुषार्थतयेति शेषः, 'उन्मार्गं' विपयप्र चिप्रधानं दुर्ग पथम् । यदाहुः—"पिब खाद च सा शोभने! यदतीतं वरगात्रि! तन्न ते । न हि भीरु! निवर्तते, समुदयमात्रमिदं कलेवरम् ॥१॥" तथा 'चाटूनि' दैन्याभिव्यञ्जकसामवादविशेषास्तानि च 'स्त्रीवर्गे' योषिज्जने 'कुर्वन्ति' विदधति 'पादयोः' चरणयोः 'निपतन्तः' प्रणमन्तः । एतद्धि सत्पुरुषाणामतीव लज्जावहं, कामान्धानां त्वन्यदप्येवंविधं मण्डनमिव ॥ इति गा र्थः ॥ ६ ॥

१ अन्यत्र तु—'चारुलोचने!' इति दृश्यते ।

तदेवं कामचेष्टितं तत्फलं चाभिधायाऽथ रागवतोऽदेवत्वमापादयिष्यन् सर्वजनसाधारणचरितत्वमाह—

सव्वे वि जइ जी ,मे ंदि वट्टंति । हारणम्मि रिए, कह देवो होइ अब्भहिओ ७

व्याख्या—'सर्वेऽपि' समस्ता अपि, न तु केचिदेवत्यपिशब्दार्थः । ' :' एवकारार्थः । यदीत्यभ्यु मे । 'यदि' चेत् 'जीवाः' प्राणिन एकेन्द्रियादयः प ेन्द्रियान्ताः 'मैथुनसंज्ञायां' मोहवेदोदयसंपाद्याध्यवसायविशेषरूपायां, इन्दीत्युपदर्शने, दृष्टमेतदित्यर्थः, 'वर्तन्ते' प्रवृत्तिं कुर्वन्त्येव । तत्र संज्ञिप ेन्द्रियाणां तावत्तत्र प्रवृत्तिः स्फुट ीतिरेव । एकेन्द्रियाणामव्य संज्ञानामप्यशोकबकुलादीनां वनस्पतिविशेषाणां रणन्नूपुरतरुणीचर ताडनमुखासवप्रक्षेपादिविधानतो हर्षवि ेषजन्यपुष्पोद्गमोपलम्भादनुमीयते । तद्दृष्टान्तेन पृथिव्यादीनामपि । तथा च रागवतो देवस्यापि मैथुनप्रवृत्तौ[1] 'साधारणे' सर्वप्राणिनां समाने 'चरिते' चेष्टिते सति 'कथं' केन प्र रेण 'देवः' पूज्यतमः 'भवति' संपद्यते 'अभ्यधिकः' शेषप्राणिभ्योऽत्यन्तमुत्कृष्टः ? न कथञ्चिदित्यर्थः, उत्कर्षहेतो रागाभावस्य सर्वथाप्यभावात् । इति गाथार्थः ॥ ७ ॥

सांप्रतं सर्वजनसमानचरितत्वेन रागिणो देवत्वाभाव पदर्शयंस्तद्रहितस्य देवत्व पसंहर ाह—

जइ ाो वि ो, ठोगे स ार ह णु । तम्हा रा ्को, दे ि जियव्वो ८

---

१ 'मैथुने प्रवृत्तौ' इत्यपि प्रत्यन्तरे ।

२

व्याख्या—यदीत्यभ्युपगमे । 'यदि' चेत् 'सोऽपि' देवत्वाभिमतोऽपि, आस्तामन्यः, किम्? इत्याह—'समानगुणः' विषयाद्यासेवनेन तुल्यधर्मा 'लोकेन' रागादिमता सामान्यजनेन तदेति शेषः। 'तस्य' सामान्यजनस्य 'तारकः' प्रणामादिना सं रसिन्धुपारप्रदः 'कथं नु' इत्यनुस्वारलोपः प्राकृतत्वात्, केन प्रकारेण?, नुर्नन्वर्थे अक्षमायाम् । ततश्च न क्षम्यत एतत्-यदुतासावपि तारक इति । ननु कः सचेतनः सरागस्य देवत्वमभ्युपेयात्? वीतरागस्यैव सर्वकर्तुरनादिसिद्धस्येश्वरादेर्देवत्वेनाभ्युपगमात्, ततः किमनेनानभ्युपगतोपालम्भेन? इति चेत्, सत्यमेतत्, किन्तु तस्य सदा स्त्रीसंसर्गित्वेन वीतरागताया एव चिन्त्यत्वात् । तथा चोक्तं वाक्पतिराजेन—"देहद्धद्धपरिट्ठिय—गोरिहराराहणिक्कहिययं व । खंडत्तणेण पणमह, परिट्ठियं तिनयणमयंकं ॥ १ ॥" तथा—"गणवइणो सइ संगय—गोरीहरपिम्मरागविलियस्स । दन्तो वाममुहद्धंत,—पुंजिओ जयइ हासु व्व ॥ २ ॥" न च सर्वमेतदर्वाचीनावस्थस्यैवेति वाच्यम् । अनादिसिद्धत्वरूपपरावस्थायाः सर्वकर्तृत्वस्य च प्रमाणविरोधात् । एवं विष्णुप्रभृतिष्वपि वाच्यम् । रागद्वेषाभाववतो रागद्वेषमोहाभाववतश्च देवत्वोपसंहारस्य वक्ष्यमाणत्वेऽपि यदत्र केवलरागाभाववतो देवत्वोपसंहरणं तद्दोषलेशसद्भावस्यापि सर्वथा देवत्वस्याभावख्यापनार्थमिवगन्तव्यम् । यतः स नगुणस्य तारकत्वं नोपपद्यते, तस्मात्कारणात् 'रागविमुक्तः' नीराग एव 'देवः' राध्यतमः 'प्रतिपत्तव्यः' अङ्गीकार्यो मुक्त्यर्थिभिराराध्यत्वेन । इतिशब्दो रागानुगतवक्तव्यतासमाप्त्यर्थः । इति गाथार्थः ॥ ८ ॥

१ देहार्धार्धपरिस्थितगौरीहराराधनैकहृदयमिव । खण्डत्वेन प्रणमत, प्रतिष्ठितं त्रिनयनमृगाङ्कम् ॥ २ गणपतेः सदा संगत—गौरीहरप्रेमरागव्रीडितस्य । दन्तो वाममुखार्धान्त—पुंजितो जयति हास इव ॥

अधुना द्वेषस्यापि फलं चेष्टितं चाभिधित्सुस्तल्लक्षणं प्राह—

दोसो वि मच्छरित्तं, परगुणउवघायकारिया बुद्धी । परउवघायपरो वा, अज्झवसाउ त्ति दोसो उ ९

व्याख्या—'द्वेषोऽपि' अमर्षोऽपि 'मत्सरित्वं' परगुणासहिष्णुत्वम्, तदेव किम्? इत्याह—'परगुणोपघातकारिता बुद्धिः' "कथं मयाऽन्यगुणा हन्तव्या?" इति परगुणोपघातकारितायां परगुणोपघातकारिका वा सामान्येन मतिः। गाथान्तवर्ती द्वेषशब्द एवं योज्यः, "परोपघातपरो वा" अन्यजनव्यापादननिष्ठो वा 'अध्यवसायः' परिणामविशेषो द्वेषः, इति गाथान्ते संभन्त्स्यते। पुनर्द्वेषपदोपादानं तु लक्षणान्तरसंबद्धतया न दुष्टमिति। पूर्वत्र हि गुणेष्वेव, अत्र तु गुणिन्यपि घातबुद्धिः। तथा पूर्वत्र सामान्येन, अत्र तु शत्रुप्रभृतिविशेषनिष्ठतयेति विशेषः। 'इति' द्वेषलक्षणपरिसमाप्त्यर्थः। 'तुः' पूरणार्थः। यद्वा सर्वेऽप्येते द्वेषस्यैव पर्यायाः, अतश्चैवंविधद्वेषवान् कथं देवः? इत्यभिप्रायः। इति गाथार्थः ॥ ९ ॥

सांप्रतं द्वेषफलस्याप्यत्यन्तं वचनागोचरत्वमाह—

दोसेणं जमणत्थं, जीवो पावेइ गरहणाईयं । को तं वन्नेउमलं, जीवन्तो वासकोडिं पि ॥ १० ॥

व्याख्या—'द्वेषेण' अमर्षेण हेतुभूतेन 'यं' कमपि 'अनर्थं' व्यसनं 'जीवः' प्राणी 'प्राप्नोति' लभते। जात्यपेक्षयैकवचनम्। "गर्हणादिकम्' गर्हणं तरसमक्षं निन्दनम्, आदिशब्दात् खिंसादिपरिग्रहः। दीर्घत्वं प्राकृतत्वात्। इहभवे वाचनिकाऽशुभफलप्राप्तिस्तावदेवम्, कायिकीं तु सूत्रकार एव दर्शयिष्यते। परभवे तु क्रकचपाटनकुम्भीपाकादिकं महाघोरं फलमिति

आदिशब्दार्थः । ' कः ' पुरुषविशेषः ' तं ' अनर्थं द्वेषसंपाद्यं ' वर्णयितुं ' उत्कीर्तयितुं ' अलं ' समर्थः ?, न कश्चिदित्यर्थः । कीदृक् ? इत्याह—' जीवन् ' प्राणान् धारयन् ' वर्षकोटिमपि ' वत्स क्षशतमपि, आस्तां वर्षशताद्यायुरित्यपिशब्दार्थः, अनन्तत्वात्तदनर्थस्य । इति गाथार्थः ॥ १० ॥

अथ तच्चेष्टितमाह—

पिइ ाइभइणिभज्जं, दोसेणं णइ त्तमवि निद्धं । परलोया मकंडे, विओ ं नत्थि जं न करे ११

व्याख्या—पित्रादयः प्रसिद्धाः । पितृमातृभगिनीभार्यमिति समाहारद्वन्द्वः । एतत्सर्वं पुत्रपर्यन्तं ' द्वेषेण ' अमर्षेण हेतुभू ' हन्ति ' विनाशयति । अपिर्भिन्नक्रमः, तेन ि ग्धमपि, आस्तामुदासीनं द्विष्टं चेत्यपिशब्दार्थः । पुत्रस्य पृथग्निर्दे ो गृह-कुटुम्बाद्याधारत्वेनाति ि ग्धत्वख्या ार्थः । एतच्च कोणिकराजपरशुरामाद्युदाहरणैः सर्वं सुप्रसिद्धमेव । एवं ' परलोकानां ' आत्मव्यतिरि ां पित्राद ामेव । अथवा पित्रादिभ्यः स्वजनेभ्योऽन्येषां प्रातिवेश्मिकादीनां लोका ' ' काण्डे ' -राधाभावेनाप्रस्ताव एव ' कुपितः ' रुष्टः सन् ' तत् ' अकृत्यं ' नास्ति ' न विद्यत एव जगति ' यत् ' सौ द्वेषवान् ' न करोति, ' स्वपरलोकेषु वधाक्रोशमार पर्यंतानन्तानर्थसार्थसंपादकत्वात्तस्य । इति थार्थः ॥ ११ ॥

अथैहभविकं कायिकं, तस्यानर्थफलमाह—

पच्छा लोएणं ो, उब्बज्झइ ई सूलाए । पोइ तिक्खाए, छिज्जइ सिघायमाईहिं १२

व्याख्या–'पश्चात्' इति स्व ादिवधानन्तरं ' ेकेन' राजादिष्टदण्डपाशिकादिजनेन 'सः' इति स्वजनादिहन्ता 'उद्धध्यते' कण्ठपाशादिबन्धेन अधोमु पादादिबन्धेन वा वृक्षादौ संयम्यते, 'हन्यते च' मुष्टियष्टिलोष्ठादिभिराभूमिपातं ता ते, चः समुच्चये, 'शूलायां' वा 'तीक्ष्णायां' तिनि ताग्रस्थूणायां 'प्रोयते' मर्मप्रदेशव्यधपूर्वकं स्यूयते, 'छि ते' वा शिरश्छेदादिना द्विधा क्रियते, ' सिघा दिभिः' कुन्तप्रहारादिभिः । इति गाथार्थः ॥ १२ ॥

रागद्वेषयोरन्यतरभावेऽप्यन्यतरस्याभावात् चिदीषन्निर्दोषता भविष्यतीति शङ्कानिरासाय तयोः कृतकत्वानित्यत्वयो-रिवान्योन्याविनाभावमाविर्भावय ाह—

रागवि यादभिन्ने, दोसो तवि गोयराणन्ने । रागो म्हा दुन्निवि, अ गोन्न या इमे लोए ॥१३॥

व्याख्या–'रागविषयात्' सदा कूलत्वेन प्रीत्युत्पत्तिस्थानाद्योषिदादेरिन्द्रियार्थात् ' भिन्ने' अभेदवति स्मिन्नेव विषय इत्यर्थः। तोऽपि प्रतिकूलेऽतथाविधेऽपि वा विपर्ययात्तथाविधबुद्धिविषये 'द्वेषः' ेषो भवति, यथाऽन्तःपुरदा दे चेल्लनादेव्यां श्रेणिकस्य । तथा 'तद्विषयगोचरानन्यस्मिन्' इति तद्विषयो–द्वेषविषयः, स चासौ गोचरश्च–इन्द्रियार्थश्चेति कर्मधारयस्तस्मात् । तेनायमर्थः–अत्यन्तप्रतिकूलत्वेन द्वेषोत्पत्तिस्थानाद्गोचरा न्नुप्रभृतेरनन स्मिन्–तरि व तोऽप्य-नुकूलेऽतथाविधेऽपि वा विपर्ययात् तथा द्विविषये 'रागः' प्रीतिर्भवति, यथा पर्युषणायां बन्दिमो ादेशे ो स्पता-वुदायननृपस्य । यत एवमेकविषयत्वमनयोः 'त ात्' ततो हेतोः द्वावपि 'अन्योन्य ौ' एकवि त्वेन परस्परानुषक्तौ

'इमौ' एतौ रागद्वेषौ । यथा चैवं ।प्रदीपे शोष्णस्पर्शाविवेकाधारावपि, नह्यन्यथा प्रकृतशङ्कानिरासः । ननु सूक्ष्मसंपरायगुणस्थानवतः सूक्ष्मलोभलक्ष सद्भावेऽपि द्वेषाभावात् कथमेकाधारता ? इत्यत ह–'लोके' स्थूलधाति सामान्यजने । : कथं लोकोत्तरगुणस्थानवर्तिना तेन व्यभिचारः ? । एवं च कथमेकभावेऽन्याभावादीषदपि दौं । खण्डिमण्डलाभिमतदेवानाम् ? कार्याभिव्यङ्ग्यस्थूलतरकप ङ्कितत्वात्तेषाम् । इति गाथार्थः ॥ १३ ॥

एवमनयोस्तुल्यविषयाधारतया साम्यं र्थ्य तुल्यफलत्वमुपदर्शयंस्तद्वतो देवत्वाभावमाह—

इह लोए निंदखिंसं, लहंति परलोए नरयदुक्खाइं। रागद्दोसेहिंतो, तेसु ठिओ कह देवो त्ति ॥१४॥

व्याख्या–'इह लोके' जन्मनि 'निंदाखिंसं' इति तत्समक्षं गर्हणं निन्दा, लोकसमक्षं जात्याद्युद्घट्टनं खिंसा, : ाहारः । 'लभन्ते' प्राप्नुवन्ति, 'परलोके' जन्मान्तरे 'नरकदुः ानि' दुर्गतिया :, 'रागद्वेषाभ्यां' हेतुभूताभ्यां तद्वन्तः प्राणिन इत्यर्थः । थैतदुभयदोषवतो देवत्वाभावमुपसंहरन्नाह– एवं : 'तयोः' रागद्वेषयोः 'स्थितः' वर्त्तमानः कथं देव इति पूर्ववत् । रागा ध्मातमानसत्वादसर्वज्ञत्वादव्यभिचारि ाप्रणेतृत्वात्त नैव देवत्वम् । इति गाथार्थः ॥१४॥

अथ मोहस्य दर्शयन् रागद्वे ोरपि तन्मूलत्वमाह—

मोहो पुण , णत्थाण रणं । रागद्दोसावि फुडं, प्पभवा निच्छओ एस ॥१५॥

व्याख्या—'मोहः' असम्यक्प्रतिपत्तिः, पुनःशब्दो रागद्वेषाभ्यामस्य विशेषणार्थः। 'अज्ञानम्' इति नञ् कुत्सायां, तेन मिथ्याज्ञानमित्यर्थः। 'सकलानर्थानां' ऐहभविकादिसमस्तव्यसनानां पूर्वोपदर्शितानां 'कारणं' हेतुः 'तत्' इति अज्ञानमेव। 'तुः' अवधारणे। तदुक्तम्—"अज्ञानं खलु कष्टं, क्रोधादिभ्योऽपि सर्वपापेभ्यः। अर्थं हितमहितं वा, न वेत्ति येनावृतो लोकः॥ १॥" ननु रागद्वेषयोरेव सर्वानर्थसंपन्निष्पादकता निःसीमास्ति, तत्किमस्य ताभ्यां सकाशादाधिक्यम् ?। अत आह—'रागद्वेषावपि' आस्तामनर्थसार्थस्तत्संपादकावपि रागद्वेषावित्यपिशब्दार्थः। 'स्फुटं' व्यक्तमिति प्रभवनक्रियाविशेषणम्। 'तत्प्रभवौ' मोहोद्भूतौ 'निश्चयः' निर्णय एषः, नात्र संशयः। मोहस्य मूलप्रकृतित्वेन रागद्वेषयोर्लोभक्रोधपर्यायविशेषतया तदुत्तरकार्यपरिणामरूपत्वात्तत्कार्यं तत्त्वतो मोहकार्यमेव, विषाजीर्णव्यापादनवत्। इति गाथार्थः॥ १५॥

अथ मोहस्य चेष्टितं स्पष्टयंस्तस्यानर्थहेतुत्वक्रममाह—

अन्नाणंधा जीवा, पाणिवहाईसु जं पयट्टंति। तत्थ य असुहं कम्मं, तत्तो नरयम्मि दुक्खाइं ॥१६॥

व्याख्या—'अज्ञानान्धाः' मिथ्यादर्शनोपहतसद्दृष्टयः 'जीवाः' प्राणिनः 'प्राणिवधादिषु' स्थूलजीवहिंसादिषु, अनेन तन्मूलद्वेषकार्यं प्रतिपादितम्, आदिशब्दात् तन्मूलरागकार्यं मद्यमांसाङ्गनासङ्गादिपरिग्रहस्तेषु। 'यत्' यस्मात् 'प्रवर्तन्ते' उद्यच्छन्ति। 'तत्र च' तत्प्रवर्तने च सति 'अशुभं' कटुकविपाकतया संवेद्यमसातादिलक्षणमशोभनं 'कर्म' ज्ञानावरणीयाद्यष्टप्रकारमपि बध्नन्तीति शेषः। 'ततः' तस्मात् बद्धात् कर्मणः सकाशात् 'नरके' इति दुर्गतिमात्रोपलक्षणं, तेन तिर्यग्-

मानुषत्वादिगतौ सर्वत्रापि ‘ दुःखानि ’ दुःसह ाणि ानि प्नुवन्तीत्यध्याहारः । तदेवं रागादित्रयवतो देवस्यापि भवभ्रमणमेव, न तु लोकनि ारकत्वं, स्वयमेवास्वस्थत्वात् । इति गाथार्थः ॥ १६ ॥

ननु मोहवतो रागद्वेषाववश्यम्भाविनाविति तावन्निश्चितम्, तद्धेतुकत्वात्तयोः । मोहवत्त्वमेव तु कुतस्तस्य निश्चेयम् ? इति सदृष्टान्तं तल्लिङ्गमाह—

सो नज्जइ ाी, ीवे मारेइ धम्मलोभे । गरहुत्तो गच्छइ, भणइ य वच्चामि हिमवंते ॥१७॥

व्याख्या–‘ सः ’ पुरुषः ‘ ज्ञायते ’ लिङ्गतोऽवगम्यते ‘ अज्ञानी ’ इति विपर्यस्तज्ञानवान् । तच्छब्दस्य यच्छब्देन नित्यसंबन्धाद् य इति गम्यते । लिङ्गमाह–यः ‘ जीवान् ’ स्थूलप्राणिनोऽपि छागादीन् ‘ मारयति ’ वधानुमतिभ्यां यजमानादिना व्यापादयति ‘ धर्मलोभेन ’ स्वर्गादि धनश्रेयोऽभिलाषेण, ‘ एषां तावदित्थं प्रवर्तमानानां धर्म एव, ममाप्येवमुपादिशत एव धर्मः ’ इत्यभिप्रायवानित्यर्थः । “ तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजेत, राजसूयेन यजेत, अग्नीषोमीयं पशुमालभेत, स्वर्गकामो यजेत ” इत्यादिभिर्विधिवाक्यैः स्वर्गार्थिनस्तत्र प्रवर्तयन् मारयतीत्यर्थः । धर्मलोभेनेत्युपलक्षणम्, तेन लोकरक्षादिकारणेन, स्वयमेव वा मारयति जीवानन्धकहिरण्यकशिपुप्रभृतीनसुरान् । ततो जीवनधतदुपदेशलिङ्गोपलम्भादनुमीयते ‘ नूनमसावज्ञानी ’ इति, न ह्यविपर्यस्तमतिः प्राणिरक्षासाध्यं धर्मं तद्वधेनोपदर्शयेदिति भावः । अत्रैवानुरूपं ान्तमाह–‘ सागरहुत्तो ’ समुद्राभिमुखं दक्षिणादिशीत्यर्थः, ‘ गच्छति ’ याति कश्चिदज्ञः । स चान्येन पृष्टः सन् ‘ भणति

च ' प्रतिभाषते च । च ब्दो 'भावितप्रतिभाषणसमुच्चयार्थः । किं भणति ? इत्याह—'व्रजामि' गच्छाम्यहं 'हिमवति' दीच्याचलविशेषे । यथा हि दक्षिणस्यां प्रस्थितस्य हिमवद्गमनकथनं विरुद्धं, तथैव धर्मार्थिनो जीववधोपदर्शनमिति भावः । अत्र च प्रयोगः— शिवधहेतुकधर्मभाषको देवो मिथ्याज्ञानवान्, दृष्टेष्टविरोधिभाषकत्वात्, अपाचीप्रस्थितहिमवद्ग- मनभाषकवत् । थवा वेदे यागहिंसाप्रतिपादकोऽसम्यग्ज्ञानी, पूर्वापरविरुद्धभाषकत्वात्, पूर्वं स्वस्य क्षत्रियाभिधानपुरस्सरं पश्चा ाह्मणत्वाभिधायकवत् । न चायमसिद्धो हेतुः, " न हिंस्यात् सर्वभूतानि " इत्यादिपूर्ववाक्यैर्यागहिंसाप्रतिपादकवा- क्यानां वि त्वादिति । श्रूयते च बहु ः प्रवृत्तिः प्राणि वधाय ौकिकदे नां शस्त्रग्रहादिषु । तदुक्तम्—" शक्रं वज्रधरं बलं हलधरं विष्णुं च च धं, स्कन्दं क्तिधरं श्म ानिलयं ' त्रिशू । धम् । एतान् दोषभयार्दितान् गतघृणान् बालान् विचित्रायुधा—न्नानाप्राणिषु चोद्यतप्रहरणान् कस्तान्नमस्येद् धः ? ॥ १ ॥ " इति । तथा च मोहोपहतत्वान्न देवत्वमेषामिति भावः । इति गाथार्थः ॥ १७ ॥

अथैतद्दोषवतो वि ेषेणादेवत्वाभिधानपूर्वकं दोषत्रयाभाववतो देवत्वमुपसंहरन्नाह—

जो ज्जमं ेवी, वि रेइ णु े देवो । एएहिं वि क्को, देवो लिंगेहिं नायव्वो ॥१८॥

व्याख्या—मद्यमांसे—सुरापिशिते, तदासेवी—तदुपभोक्ता, योषिदाद्युपभोगोपलक्षणं चैतत्, तेन स्त्रीभोक्ता च । 'यः' इति सामान्यनिर्देशेन पा ण्डिमण्डलाभिमत स्तदेवपराम ः । े कश्चिन्मद्यस्य े कः, अपरो मांसस्य, अन्यः सर्वस्यापीत्यर्थः ।

तदुक्तम्—"रुद्रो रागवशात् स्त्रियं वहति यो हिंस्रो दयावर्जितो, विष्णुः क्रूर ः कृतघ्नचरितः स्कन्दः स्वयं ज्ञातिहा। क्रूरार्या महिषान्तकृन्नरवसामांसास्थिकामातुरा, यानेञ्छश्च विनायको जिनवरे स्वल्पोऽपि दोषोऽस्ति कः ? ॥ १ ॥" तथा जीवान् मारयतीति कथं नु स देव इति च पूर्ववद्व्याख्येयम्, भावनीयं च। च जीवभक्षणवधाभिधायिनी तेषामेवैवं श्रुतिः—"शशकः शल्लकी गोधा, कूर्मः खड्गी च प ः। प पञ्चनखा भक्ष्याः" इत्यादि। एवं च कथं तेषामेवं वैशसकर्मकारणोपदेशसमुद्यतानां देवत्वमूलनिबन्धनं कारुण्यम् ?। कारुण्याभावव्यञ्जकं सुप्रसिद्धमेवैषां प्राणिघातकत्वम्। तथाहि—"[1]पंचिंदितणुसमुत्थं, महइ सचित्तं पि मंसपेसिं जो। पत्तपडियं न दूसइ, कारुणिओ सो कहं बुद्धो ? ॥ १ ॥ निच्चं न्हाणविहाणं, ज यअसंखजिय रुघरट्टं। धम्मत्थमुवइसंतो, कारुणिओ होइ कह कविलो ॥ २ ॥ भट्टो भग्गमरट्टो, जाओ करुणापरायणसभा । निग्घिणनरपसुमेहं, वेयपवुत्तं पवत्तंतो ॥ ३ ॥ कणभक्खअक्खपाया, पावं नरमेहहोममाईयं। रुद्दुत्तं ति कुणंता, कह करुणासायरा हुंतु ॥ ४ ॥ कावालियावि नरसिर–कवालहत्था करालभूइल्ला। हिययलुलियट्ठिमाला,

---

१ पञ्चेन्द्रियतनुसमुत्थां, कांक्षति सचित्तामपि मासपेशीं यः। पात्रपतितां न दुष्यति कारुणिकः स कथं बुद्धः ? ॥ २ नित्यं स्नानविधानं, जलगतासंख्यजीवगुरुघरट्टम्। धर्मार्थमुपदिशन्, कारुणिको भवति कथं कपिलः ॥ ३ भट्टो भग्नमानो, जातः करुणापरायणसभासु। निर्घृणनरपशुमेधं, वेदप्रोक्तं प्रवर्त्तयन् ॥ ४ कणभक्षाक्षपादौ, पापं नरमेधहोमादिकम्। रुद्रोक्तमिति कुर्वन्तौ, कथं करुणासागरौ ताम् ॥ ५ कापालिका अपि नरशिरः–कपालहस्ताः करालभूतिमन्तः। हृदयलुलितास्थिमाला, दयालुकाः कथं रुद्रमताः ॥

दयालुया कह णु रुद्दमयी ॥ ५ ॥ जे[2] जोगवड्ढणट्ठं[3], गेयं सेवंति कोलमयरुइणो ॥ पयडविड व्व न ते वि हु, धम्मत्था जेण हसियमिणं ॥ ६ ॥ रंडा[4] चंडा दिक्खिया धम्मदारा, भिक्खा भुज्जं चम्मखंडं च सिज्जा । मज्जं मंसं पिज्जए खज्जए वा, कोलो धम्मो कस्स नो भाइ रम्मो ॥ ७ ॥ पासंडिमंडलाभिमय[5]-,देवयासेवियम्मि ही मूढा । इय मग्गम्मि पयट्टा, कहमपवग्गं विमग्गंति ॥ ८ ॥" एतच्च माध्यस्थ्येन विचारमात्रं क्रियतेऽस्माभिर्न तु क्वचिद् रागद्वेषादेः । यतः—" नास्माकं सुगतः पिता न रिपवस्तीर्थ्या धनं नैव तै-र्दत्तं नैव तथा जिनेन न हृतं किञ्चित्कणादादिभिः । किन्त्वेकान्तजगद्धितः स भगवान् वीरो यतश्चामलं, वाक्यं सर्वमलापहन्तृ च यतस्तद्भक्तिमन्तो वयम् ॥ १ ॥" किमित्यवश्यं देवस्य रागाद्यभावो गवेष्यते ? इति चेत्, पारलौकिकानुष्ठानेषु स्वर्गापवर्गसाधनत्वे प्रत्यक्षादिप्रमाणाभावात्त-द्वचनप्रामाण्येनैव प्रवृत्तेः, रागादिमतश्च तदभावात् । यदुक्तम्—" परलोयम्मि[6] पमाणं, वयणं चिय तं च विगयदोसस्स । पुरिसस्स तेण देवं, वयंति रागाइरहियं ति ॥१॥" तदेवं रागादिमतामदेवत्वं व्यवस्थितं यतः—'ता' इति तस्मात् 'एतैः'

---

१ 'नया' इति प्रत्यन्तरे । २ ये योगवर्द्धनार्थं, गेयं सेवन्ते कौलमतरुचिमन्तः । प्रकटविटा इव न तेऽपि खलु, धर्मार्थी येन हसितमिदम् ॥ ३ 'जोगवट्टनट्टं' इति प्रत्यन्तरेषु ॥ ४ रण्डा चण्डा दीक्षिता धर्मदारा, भिक्षा भोज्यं चर्मखण्डं च शय्या । मद्यं मांसं पीयते खाद्यते वा, कौलो धर्मः कस्य नो भाति रम्यः ॥ ५ पाखण्डिमण्डलाभिमत,—देवतासेविते ही मूढाः । इति मार्गे प्रवृत्ताः, कथमपवर्गं विमृगयन्ति ॥ ६ परलोके प्रमाणं, वचनमेव तच्च विगतदोषस्य । पुरुषस्य तेन देवं, वदन्ति रागादिरहितमिति ॥

त्रिभिरपि रागादिभिर्विशेषेणापुनर्भावितया मुक्तः–वर्जितः 'देवः' सर्वप्रकाराराध्यतमः 'लिङ्गैः' स्त्रीशस्त्रत्यागतत्त्वोपदेशादिभिर्लक्षणैः 'ज्ञातव्यः' बोद्धव्यो मुमुक्षुभिरिति । तदुक्तम्—"न यः शूलं धत्ते न च युवतिमङ्के समदनां, न शक्तिं चक्रं वा न हलमुशलाद्यायुधधरम् । विनिर्मुक्तं क्लेशैः परहितविधावुद्यतधियं, शरण्यं भूतानां तमृषिमुपजातोऽस्मि शरणम् ॥ १ ॥" तथा—"त्यक्तस्वार्थः परहितरतः सर्वथा सर्वरूपं, सर्वाकारं विविधमसमं यो विजानाति विश्वम् । ब्रह्मा विष्णुर्भवतु वरदः शङ्करो वा जिनो वा, यस्याचिन्त्यं चरितमसमं भावतस्तं प्रपद्ये ॥ १ ॥" सूक्ष्मबुद्ध्या च विचार्यमाण एवंलक्षणको जिन एव देवः प्रतिभासते । यदुक्तम्—"जिनेन्द्रो देवता तत्र, रागद्वेषविवर्जितः । हतमोहमहामल्लः, केवलज्ञानदर्शनः ॥ १ ॥ सुरासुरेन्द्रसंपूज्यः, सद्भूतार्थप्रदर्शकः । कृत्स्नकर्मक्षयं कृत्वा, संप्राप्तः परमं पदम् ॥ २ ॥" तथा—"चउतीसअइसयजुओ, अट्ठमहापाडिहेरकयसोहो । दसअट्ठदोसरहिओ, सो देवो नत्थि संदेहो ॥ १ ॥" वीतरागस्य च तस्य भगवतस्तत्त्वोपदेशकत्वं निर्विवादम् । तदेवागमः, तदु म्—"आगमो ह्याप्तवचन–माप्तं दोषक्षयाद् विदुः । वीतरागोऽनृतं वाक्यं, न ब्रूयाद्धेत्वसंभवात् ॥ १ ॥ रागाद्वा द्वेषा , मोहाद्वा वाक्यमुच्यते ह्यनृतम् । यस्य नैते दोषा–स्तस्यानृतभाषणं किं स्यात् ? ॥ १ ॥" तत् सिद्धमेतत्–विवादाध्यासितो वीतरागः सर्वदा स्त्रीशस्त्राद्यनासङ्गित्वान्मुक्तात्मवत् । तथा च ति विसंवादिवचनोऽ , वीतरागत्वात्, यस्तु विसंवादिवचनो नासौ वीतरागः, यथा विप्रलम्भकादिः ।

१ चतुस्त्रिंशदतिशययुत., अष्टमहाप्रातिहार्यकृतशोभः । दशाष्टदोषरहितः स देवो नास्ति संदेहः ॥ २ अन्यत्र 'कारणं' इति दृश्यते ।

रागादेरेव च सम्यग्ज्ञानं प्रति महावरणत्वात्, तस्य च जलदपटलस्येवात्यन्ताभावे भास्वन्मण्डलस्येव तस्य सार्वज्ञरूपं सर्वप्रकाशकत्वमपि प्रमाणसिद्धमेवेति युक्तमस्य निर्दोषत्वात्सर्वातिशायित्वाच्चाराध्यतमत्वम् । इति गाथार्थः ॥ १८ ॥

देवस्वरूपप्र ानन्तरमत्यन्तधर्मस्पृहयालोर्धर्मप्रश्ने सति तदुत्तरे वक्तव्येऽपि तदुल्लङ्घ्य " समाराधितो ह्युपदेष्टा सम्य- ् पादि ति " इति न्यायमभिसंधाय देवस्वरूपाभिधानानन्तरमेव तदाराधनोपा श्नस्योत्तरमुक्तवान् यक्तिज्ञतयाऽऽचार्यः । ा ष्यस्य वीतरागत त्पूजादिनाऽऽराधनासंभवात् क ाराधनोपायः ? इत्याशयवतस्तदाराधनोप प्र े प्रत्युत्तरमाह—

साराहणमेयं, तव्वयणाराहणं ति निच्छयओ । ारवाहिहरणं, सवदारा पडिलोमं ॥१९॥

व्याख्या—'तस्य' वीतरागस्य ' ाधनं' प्रसादनं 'एतत्' अनन्तरमेव वक्ष्यमाणं, तदेवाह—'ि श्चयतः' निश्चयनय - श्रित्य 'तद्वचनाराधनमिति' तदाज्ञासम्यगासेवनम्, तेन—'व्यवहारन ोऽन्यदप्यस्तु ाचिवकत्वाद्, न तत्परमार्थतः ाराधनम्' इत्येतत् इति शब्देनाराधनोपायप्रकारोपदर्शकेन व्यनक्ति । भिप्रायः-यद्यप्यस्य राजादेरिव : ादनल- चणमाराधनं न संभवति वीतरागत्वात्, त प्येतद्वचनाराधकानां र ादि ादनमिव प्रसाद यं पदला ेपलम्भात् प्रसादनोपचारः । प्रसादनं च द्वेधा, व्यवहारतो ि श्चयतश्च । नरेतद् य पि द्रव्यभावार्चनभेदाद् द्विधा । तत्र यत् त्रिसन्ध्यं विशिष्टभावविकलै र्लौकिकैरिव ात्रवलिमहाप्रेक्षण दिभिराराधनं तद् हारतो द्रव्यार्चनम्, वार्चनाऽहेतुत्वे-

नानर्थकत्वात्। यत्तु विधिना जिनभवनविधापनादिपूर्वकं त्रिसन्ध्यमेव भावसारमभ्यर्चनं तन्निश्चयतो द्रव्यार्चनम्, भावार्चनहेतुत्वात्। तदुक्तम्—"जिणभवणबिंबठावण–जत्तापूयाइ सुत्तओ विहिणा। दव्वत्थउ त्ति नेयं, भावत्थयकारणत्तेणं ॥१॥" द्रव्यार्चनादिलक्षणतात्त्विकमोक्षमार्गद्वयनिरूपणेऽस्यैव परिसंख्यानात्। एवं विशिष्टचारित्रभावविकलस्य लिङ्गिनोऽनुष्ठानेन यदाराधनं तद्व्यवहारतो भावार्चनम्, विवक्षितफलासाधकत्वात्। यच्च भावयतेरविकलानिरवद्यानुष्ठानेन तदाराधनं तन्निश्चयतो भावार्चनम्।—"दव्वत्थओ य भाव–त्थओ य दव्वत्थओ बहुगुणु त्ति। बुद्धि सिया अनिउणजण–वयणमिणं छज्जीवहियं जिणा बिंति ॥ १ ॥" इति ॥ तीर्थकृद्वचनस्यैवमेव सम्यगाराधनात्, निश्चयद्रव्यार्चनस्याप्येतदशक्तस्यैवोपदेशात्, अवश्याभिमतफलप्रदत्वाच्च, शेषस्य तु व्यवहारार्चनस्य तदाराधनानुपायत्वात्। तदुक्तम्—तुमम[3]च्छीहिं न दीससि, नाराहिज्जसि पभूयपूयाहिं। किंतु गुरुभत्तिरागे–ण वयणपरिपालणेणं च ॥ १ ॥" अत्र च वचनाराधनोपायसाध्यत्वेऽपि जिनाराधनस्य साध्यसाधनयोरभेदोपचारात् तद्वचनाराधनमेव तदाराधनमुक्तम्। तत् स्थितमेतत्–तद्वचनाराधनमेव तदाराधनमिति। अस्य फलप्रदत्वमेवाविर्भावयन्नाह–'संसारव्याधिहरणं' नानाशारीरमानसबाधाधायकत्वात् संसार एव

१ जिनभवनबिम्बस्थापन–यात्रापूजादिः सूत्रतो विधिना। द्रव्यस्तव इति ज्ञेयं, भावस्तवकारणत्वेन ॥ २ द्रव्यस्तवश्च भावस्तवश्च द्रव्यस्तवो बहुगुण इति। बुद्धिः स्याद् अनिपुणजन–वचनमिदं षड्जीवहितं जिना ब्रुवते ॥ ३ त्वमक्षिभ्यां न दृश्यसे, नाराध्यसे प्रभूतपूजाभिः। किन्तु गुरुभक्तिरागेण, वचनपरिपालनेन च ॥

व्याधिस्तस्य हरणं–ध्वंसकम्, मुक्तिहेतुत्वात्, इतरस्यैवं सामर्थ्याभावात् । एतदपि कुतः ? इत्याह–‘ आश्रवद्वाराणां ’ नूतनकर्मोपादानस्थानानां ‘ प्रतिलोमं ’ इति प्रतिकूलं, यतः सर्वाश्रवद्वारनिरोधरूपस्य भवध्वंसकत्वभावात् । इति गाथार्थः ॥ १६ ॥

एतदेव दृष्टान्तद्वारेण गाथाद्वयेन स्पष्टयन्नाह—

जह इह सुविज्जवयणा, अपत्थपरिवज्जणेण पत्थासी। पावइ दृढदेहत्तं, निरुजो सइ सुक्खआवासं ॥२०॥

इय तव्वयणाओ वि हु, अन्हयपरिवज्जणा सुकडसेवी। निस्सेसकम्ममुक्को, पावइ मुक्खं सयासुक्खं॥२१॥

व्याख्या—यथेति दृष्टान्तार्थः। इहेति लोके। ‘यथा’ येन प्रकारेण ‘सुवैद्यवचनात्’ इति, वैद्यकशास्त्राभिज्ञ एकान्तकारुणिको निराशंसश्च शोभनो भिषक् सुवैद्यस्तस्य वचनाद्—एकान्तहिताद्वाक्यात्कश्चिद्रोगी ‘ अपथ्यपरिवर्जनेन ’ अहिताशनादित्यागेन ‘ पथ्याशी ’ हितमितभोजी ‘ प्राप्नोति ’ आसादयति ‘ नीरुक् ’ निरामयः सन् ‘ दृढदेहत्वं ’ सर्वथा रोगापगमात्पुष्टाङ्गत्वं ‘ सदा ’ सर्वकालं ‘ सौख्यावासं ’ व्याधिबाधाऽभावादत्यन्तानन्दास्पदम् ॥ २० ॥ ‘ इति ’ एवं ‘ तद्वचनादपि ’ जिनोपदेशादपि ‘ हुः ’ पूरणे, ‘ अन्हय ’ इति आश्रवद्वाराणि समयभाषयोच्यन्ते, तेषामपथ्यानामिव ‘ परिवर्जनात् ’–सर्वथा त्यागात्, ‘ सुकृतसेवी ’ पथ्यस्येव शुद्धचारित्ररूपसदनुष्ठानस्यासेवनशीलः ‘ निःशेषकर्ममुक्तः ’ रोगैरिव समस्तज्ञानावरणादिभिस्त्यक्तः ‘ प्राप्नोति ’ लभते ‘ मोक्षं ’ नित्यज्ञानानन्दात्मकशाश्वतजीवस्वभावात्मकं

'मैथुनपरिग्रहयोः' निधुवनद्रव्यसंग्रहयोर्विषये च विरतिः । अथवा जीवघा दिषु परिग्रहान्तेषु पञ्चस्वपि द्वन्द्वः । अदत्ता इत्यत्राऽऽकारः प्राकृतत्वात् । 'देशेन' सर्वविरत्यवयवरूपतया, न तु यतिवत्सर्वथे र्थः । तेन संकल्पजाद् द्वीन्द्रियादिवधात् कन्यादिविषयादलीकात् चौर्यापादकाददत्तात् परकलत्रविषयान्मैथुनाद् अपरिमितादर्थसंग्रहाद् निवृत्तिस्त्रिभिरपि करणैः कारणाभ्यां प्रत्याख्यानम् । एवाणुव्रतसंज्ञाख्यातिरेषाम्, महाव्रतापेक्षयाऽल्पीयस्त्वात् । एताश्च 'विरतयः' श्रावकस्य गुणा इतरजनेभ्यो व्यावर्तका धर्माः । ततश्चैताः प पि श्रावकधर्मवृक्षस्य मूलानीवेति मूलगुणाः 'एषाम्' इति श्रावकाणाम् । तथा उत्तराः—ऊर्ध्वकालभाविनो विशिष्टतरकर्मक्षयोपश ाभ्यत्वेन प्रधाना वा गुणा उत्तरगुणाः, शाखादिवत् । विभक्तिलोपोऽत्र प्राकृतत्वात् । 'भवन्ति' जायन्ते ' विधाः' सप्तप्रकाराः । तत्र चादौ दिग्गमनभोगोपभोगानर्थदण्डविरतयस्तिस्रोऽपि गुणव्रताख्याः, अणुव्रतानामेव गुणायोपकाराय व्रतानि नियमा इति कृत्वा; परिमितदिगादेः परतः प्राणातिपातादीनां सर्वथा निवर्तनहेतुत्वात् । त सामायिकदेशावकाशिकपौषधोपवासातिथिसंविभागाश्चत्वारोऽपि शिक्षा ानि, पुनः पुनः करणादेषां शिक्षाऽभ्यासस्तत्प्रधानानि व्रतानीति कृत्वा । एवमेते सप्तोत्तरगुणाः । एषां च मूलगुणैर्मेलके द्वादश व्रतानि । तदुक्तम्—"पंचेव अणुवयाई, गुणव्वयाइं च हुंति तिन्नेव । सिक्खावयाइँ चउरो, सावगधम्मो दुवालसहा ॥ १ ॥" तदयमेवं द्वादशविधः श्रावकधर्मः । च द्वाविंशतिभेदभिन्नोऽपि धर्मो मुक्तिहेतुजिनाराधनोपायः, तद्वचनाराधनस्यैव तदाराधनोपायत्वात्, च तदनुष्ठानरूपत्वात् । ततः सिद्धमेतत्—"धर्मादेव मोक्षः" । इति र्थः ॥ २४ ॥

इदानीं व्रतपरिकर्मणः प्रथमं भेदमुपसंहरन् द्वितीयतृतीयभेदावाह—

इय सुणिऊणं जाणइ, पुणरुत्तं पुच्छिउं असंदिद्धं । पच्छा इच्छइ काउं, पुव्विं परिकम्मणं कुणइ ॥२५॥

व्याख्या—'इति' एवमगुरुदेवादिव्यवच्छेदेन गुरुदेवतदाराधनधर्मादिकं तदनुषङ्गेणैव मिथ्यात्वतद्धेत्वनायतनादितत्प-रिहाररूपं शीलवत्त्वगुणवत्त्वस्थानादिकं च यावत् सर्वं च ज्ञातव्यम् । 'श्रुत्वा' आकर्ण्य तदेव 'जानाति' अवगच्छति, श्रवणकार्यत्वाद् ज्ञानस्य तदनन्तरमभिधानम् । कथमयं जानाति ? इत्याह—'पुनरुक्तं' पुनः पुनः 'पृष्ट्वा' गुरुमनुयुज्य 'असंदिग्धं' निःसंशयं, शृण्वतोऽपि यदा यदा संशय उत्पद्यते तदा तदा प्रश्नेन संशयमनूद्य सम्यगवगच्छतीति द्वितीयो भेदः । ततोऽपि "ज्ञानस्य फलं विरतिः" इति तृतीयभेदमवतारयति—'पश्चात्' इति सम्यग्ज्ञानानन्तरं मुमुक्षुः संवेगातिशयात्तमेव 'इच्छति' अभिलषति 'कर्तुं' विधातुं संपूर्णमपि, तेन 'पूर्वं' प्रथमं 'परिकर्म' निरतिचारद्वादशव्रतपरिपालनरूपपूर्वसेवालक्षणं 'करोति' विदधाति । अथवा भावतस्तन्निष्ठोऽपि निबिडतरचारित्रावारककर्मोदयात्तत्र स्वस्यासामर्थ्यं निश्चित्य देशविरतावपि प्रवर्तमानः पूर्वं श्रवणादिकमेव परिकर्म करोति । इति गाथार्थः ॥ २५ ॥

अथ गृहीतपरिपालनरूपं चतुर्थं भेदमभिदधानो व्रतपरिकर्मस्थानकमुपसंहरन्नाह—

पालेइ जहासुद्धं, अइयारविवज्जियं जहासत्तिं । इय चउभेयं भणियं, पढमं ठाणं गिहत्थाणं ॥२६॥

व्याख्या—'पालयति' आसेवते श्रावकधर्ममेव 'यथाशुद्धं' सर्वथा निर्दोषम् । एतदेवाह—'निरतिचारं' निरपवादम् ।

अतीचारा ह्यशुद्धिहेतवस्तदभावाच्छुद्धमिति भावः। अतीचाराश्च सम्यक्त्वे शङ्कादयो व्रतेषु बन्धादयः प पञ्च सद्गुरुवक्त्राम्बुजादवधार्य परिहार्याः। 'यथाशक्ति' इति ।मथ्यनुरूपं, न तु यतिवत् त्रिविधं त्रिविधेनेति, शक्तिश्च चारित्रावारकवीर्यान्तरायादिकर्मक्षयोपशमवैचित्र्याद्विचित्रा। तत एव च करणकारणाभ्यां मनोवाक्कायैश्च श्रावकाणां विरतेरपि वैचित्र्योपपत्तिः। तदुक्तम्—"दुविह तिविहेण पढमो, दुविहं दुविहेण बीय ` होइ। दुविहं एगविहेणं, एगविहं चेव तिविहेणं ॥ १ ॥ एगविहं दुविहेणं, एगेगविहेणं छट्ठओ होइ त्ति।" एवं तावत्प्रथमे व्रते पड् भङ्गाः। एवं शेषेष्वप्येकादशसु पड्भेदभावे द्वितीयादिव्रतभेदैश्च पड्भिरपि प्रत्येकं योजने द्विकादिसंयोगैश्च परिगणने "तेरस कोडिसयाइं, चुलसीइ जुयाइं बारसय लक्खा। सत्तासीइ सहस्सा, दुन्नि सया चेव सद्दाणं ॥ १ ॥" इति। श्राद्धबाहुल्यं तद्विरतिबाहुल्यात्, तच्च शक्तिवैचित्र्यादिति यथाशक्तीत्युक्तम्। केवलं चारित्राकाङ्क्षिणा विशिष्टोत्तरोत्तरदेशविरतौ यत्नवता भाव्यम्, तथैव तत्परिकर्मितत्वोपपत्तेः। अपरिकर्मितात्मनो हि योधवन्न दुर्धरपरपराजयोत्साहकल्पश्चारित्राभ्युपगमसामर्थ्यातिशयः स्यात्। 'इति' एवमुक्तप्रकारेण 'चतुर्भेदं' श्रवणज्ञानेच्छापरिपालनलक्षणं चतुष्प्रकारं 'भणितं' प्रतिपादितमिति प्रकरणकार आह—'प्रथमं' आद्यं व्रतपरिकर्मसंज्ञकं 'स्थानं' श्रावकाचारविशेषलक्षणं 'गृहस्थानां' सम्यग्दर्शनदेशविरतिभाजामगारिणां श्रावकाणाम्। इति गाथार्थः ॥ २६ ॥

यत्संसारमहापयोनिधितटप्रस्थास्नुभिः प्यते, यच्चासेवितमादरेण दलयत्याशु व्रतेन्द्रावृतिम्।

 ॥ १

सर्वस्थानशिरोमणिस्त्रिभुवने यद्दुर्लभं सच्छुभै,-स्तद्दीक्षापरिकर्म शर्मशतदं संपद्यते कस्यचित् ॥१॥

॥ इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकविवृतौ व्रतपरिकर्मप्रथमस्थानकविवरणं समाप्तम् ॥

एवमुक्तं व्रतपरिकर्मनामकं प्रथमं स्थानकम् । तस्यापि निरतिचारतया सम्यगासेवनं शीलवत एव संभवतीति तदनन्तरं तस्यैवाद्यकारणभूतं शीलवत्त्वं प्रतिपिपादयिषुः पूर्वं तावत्तद्भेदसंख्यां तदाद्यभेदं तस्यापि विषयस्वरूपं चाह—

सीलत्तं पुण छद्धा, निच्चं आययणसेवणा पढमं ॥ आययणं पुण साहू, पंचविहायारसंपन्नं ॥१॥

व्याख्या—'शीलवत्त्वं' प्रागुपदर्शितार्थं 'पुनः' विशेषेण 'षोढा' षट्प्रकारम् । तदुक्तम्-"आययण १ सयलखेड्ड-परिहरण २ मेवमनिमित्तं । परघरपवेसचाओ ३ । विक्कियवयणस्स परिहारो ४ ॥ १ ॥ विक्कियवेसविवज्जण ५ मदुराराहत्तं ६ भवेच्छट्ठं ॥ आययणसेवणं तत्थ होइऽणाययणचाएणं ॥ २ ॥" 'नित्यं' सर्वदा 'आयतनसेवनं' सर्वादरेण तत्पर्युपासनलक्षणं 'प्रथमं' आद्यं शीलवत्त्वं षट्सु भेदेषु वक्ष्यमाणानायतनसंसर्गतद्भावनयोः प्रतिजन्माभ्यस्तत्वान्न कदाचित्केनायतनसेवनमात्रेण निरोधः कर्तुं शक्यस्तस्याल्पीयस्त्वात् । किन्तु नैरन्तर्याद् आयतनसेवनेनैवेत्युपदर्शनार्थमिह नित्यग्रहणमिति । सिद्धान्ते हि लोकोत्तरिकमायतनं द्रव्यभावभेदाद् द्विविधमुक्तम्, तयोरत्र भावायतनमाह—'आयतनं पुनः' ज्ञाना-

दिगुणलाभोदयस्थानं पुनः ' साधवः ' ज्ञानादिभिः प भिराचारैर्मोक्षं साधयन्ति ये ते सुविहिताः । एतदेवाह—' पञ्चविधाचारसंपन्नाः ' ज्ञानदर्शनचारित्रतपोवीर्यरूपपञ्च ारानुष्ठानविशेषयुक्ताः । ते हि दर्शनपर्युपासनादिना ज्ञानादिलाभं तन्वन्ति । भव्यानामिति भवन्ति भावायतनम् । उपलक्षणं चैतत्, तेन सिद्धान्ताभिहितसमस्तविधिप्रधानं विधिचैत्यमप्यायतनं, तस्यापि तथैव ज्ञानादिवृद्धिहेतुत्वात् । तदुक्तम्—" दव्वम्मि जिणहराइं, भावम्मि उ होइ तिविहं तु ॥ " त्रिविधमिति ज्ञानादित्रयरूपं तद्युक्तसाध्वादिलक्षणमित्यर्थः । तत्सेवनं च श्रावकाणां महाफलम् । यदुक्तम्—" आययणसेविणो सावयस्स, संवेगपमुहगुणनिवहो । वड्ढइ जहा सुखित्तम्मि, रोविओ वल्लिसंताणो ॥ १ ॥ " स्तां तावद्यत्स्वयं ते महात्मान आयतनम् । यत्रैते पवित्राचाराः परिवसन्ति तदपि तत्संसर्गपवित्रितत्वादायतनम् । यदुक्तम्—" जत्थ साहम्मिगा ', सीलवन्ता बहुस्सुया ॥ चरित्तायारसंपन्ना, आययणं तं वियाणाहि ॥ १ ॥ " तदेतत्सर्वमायतनं श्रावकाणां सेवनयोग्यम् । इति थार्थः ॥ १ ॥

अथायतनसेवाया ायतनपरिवर्जनमन्तरेण कर्तुमशक्यत्वात्तत्प्रसंगादनायतनवर्जनं तावद्गाथार्धेनाह—

वज्जेइ ाययणं, वेसित्थि दुगुंछिए कुतित्थी य ॥

व्याख्या—'वर्जयति' परिहरति श्रावकः 'अनायतनं' पूर्वोक्तायतनाद्विपरीतं ज्ञानादिहानिहेतुत्वात् । किं तत् ? इत्याह—' वेश्यास्त्री ' याङ्गना, ' जुगुप्सिता ' लोकलोकोत्तरनिन्दिता व्याधवागुरिककल्पपालादयः । ' कुतीर्थिकाः ' अन्यद-

र्शनिनः शाक्यादयः । लौकिकभावानायतनमेतत् । अस्याप्युपलक्षणत्वाल्लौकिकद्रव्यानायतनलोकोत्तरिकद्रव्यभावानायत-
नानामपि परिहारो द्रष्टव्यः । तत्र हरभवनादि लौकिकं द्रव्यानायतनम् । तदुक्तम्—" दव्वे रुद्दाइहरा " इत्यादि । असदा-
चारप्ररूपणकरणप्रवणास्तु लिङ्गिनो लोकोत्तरिकं भावानायतनम् । तदुक्तम्—" अह लोगुत्तरियं पुण, अणाययणं भावओ
मुणेयव्वं ॥ जे संजमजोगाणं, करिन्ति हाणिं समत्थावि ॥ १ ॥ " यत्र चैते जिनप्रवचनप्रतिपन्थिनो निवसन्ति तद्देश्यादि-
सदनवत्तत्संसर्गदूषितत्वात्स्थानमप्युपाधिभेदादनायतनम् । यदुक्तम्—" जत्थ साहम्मिया बहवे, भिन्नचित्ता अणारिया ॥
लिङ्गवेसपडिच्छन्ना, अणाययणं तं वियाणाहि ॥ १ ॥ " अन्यतीर्थिकपरिगृहीतानां जिनबिम्बानामप्यवन्द्यत्वाद्यभिधाना-
त्तेषामपि लोकोत्तरिकद्रव्यानायतनत्वमेव द्रष्टव्यम् । तत्र तदाराधनस्यापि सम्यक्त्वादिभ्रंशहेतुत्वात् । एवमेव चावन्द्यत्वा-
द्यभिधानमुपपद्यते, न खलु श्रुतकेवलिनोऽपि महात्मानो गुरुतरदोषानुपलम्भे पारमेश्वरप्रतिमानामवन्द्यत्वमेवमेवाभिदधती-
त्यलमतिप्रसंगेन । तद्विशेषविचारस्तु कल्पनिशीथादिभ्यो विस्तरतोऽवसेयः । सर्वत्र चात्रासदाचारदर्शनादिध्वंसहेतुत्वेनाना-
यतनत्वं स्पष्टमेवेति । अत्र च सूत्रे भावायतनानायतनग्रहणं तयोर्द्रागेव विशिष्टगुणदोषहेतुत्वख्यापनार्थं, नेतरप्रतिषेधार्थं,
भावायतनादिवदितरेषामपि क्रमेण गुणदोषातिशयोत्पादकत्वस्य साम्यात् । तथा च सुश्रावकेण ज्ञानादिवृद्धिमभिवा-
ञ्छताऽनायतनसंसर्गः सर्वथा परिहर्तव्यः । तदुक्तम्—" एवमिहमणाययणं, सुट्ठु वि धम्मट्ठियस्स सड्ढस्स ॥ होइ गुण-
हाणिहेऊ, ता एवं वज्जणिज्जन्ति ॥ १ ॥ "

" तदेवमायतनसेवनलक्षणः शीलवत्त्वप्रथमभेदः सप्रसंगः प्रतिपादितः, अथ प्रासंगिकानायतनविशेषपोषकत्वात् क्रीडानां तत्परिवर्जनं द्वितीयं गाथार्धेनाह—

बीयं पुण ठाणमिणं, किड्डापरिवज्जणं णइ ॥ २ ॥

व्याख्या—द्वितीयं पुनः स्थानं सदाचारविशेषः शीलवत्त्वे ' इदं ' एतत्, यत्किम् ? इत्याह–' क्रीडापरिवर्जनं ' द्यूतादेर्विनोदक्रियायाः परिहारं ' करोति ' विधत्ते श्रावक इति स्थानतद्भेदयोरभेदोपचाराद् द्वितीयस्थानमित्युक्तम् । एवमुत्तरत्रापि द्रष्टव्यम् । इति गाथार्थः ॥ २ ॥

अथ वर्जनीयक्रीडा एवाह—

चउरंगसारिपट्टिय–वेहाईलावगाइजुद्धाई ॥ पन्हु रजमगाई, लियाई वज्जए निच्चं ॥ ३ ॥

व्याख्या—राजहस्त्यश्वपदात्यादिचतुरङ्गकल्पनया द्यूतं चतुरङ्गं, शारिकाभिः शारैः क्रीडनं शारिद्यूतं, परिवेष्टितचर्मदीर्घपट्टिकाच्छिद्रभेदेन द्यूतं पट्टिकावेधद्यूतं, आदिशब्दादान्धिकनालचक्रादिसमस्तद्यूतग्रहः, वर्जयतीति क्रियायोगः सर्वत्र । च द्रव्यनाशहस्तादिच्छेदादयो दोषा ऐहिका अपि सुप्रसिद्धा एव । तथा लावकास्तित्तिरविशेषाः । आदिशब्दात् कुर्कुटकुक्कुरमेषमल्लादिपरिग्रहस्तेषां युद्धमन्योन्यप्रहारादिना कलहविधापनम् । आदिशब्दात्तत्कुतूहलदर्शनादिग्रहः । अत्र यो तेषामेवान्योन्यद्वेषवधबाधोत्पादादयः, दर्शने त्वसदाचारानुमोदनप्रशंसादयो दोषाः । एवं मिथ्यादृष्टिरथप्रेक्षणकनाटककुतूहलदर्शनादिष्वपि

भाव्यम् । तथा प्रश्ने प्रच्छन्ने सत्युत्तरं प्रतिवचनं प्रश्नोत्तरं, तत्प्रधानं काव्यमपि प्रश्नोत्तरम् । तच्च व्यस्तसमस्तचलद्बिन्दु- वर्धमानाक्षरशृङ्खलामञ्जरीपद्माद्यनेकप्रकारं क्रीडाकाव्यविशेषम् । यथा—" का प्रार्थ्यते विश्वजनेन सादरं, का वा विजेया बत चक्रिणा पि ॥ कीदृग् नृपः स्या परामवास्पदं, भात्यम्बरे वन्दनमालिकेव ॥ १ ॥" कासारसाबली ॥ " को चक्क- तुम्बलग्गो । गोरीदेहद्धसंगओ को वा ॥ केलीए को दलिज्जइ । तरुणीण वियड्ढ तरुणेहिं ॥ १॥" हारो लघुम री । थजातिः ॥" गीतं शंसन्ति कीदृक् किमिह तनुभृ दुःखदं रागियुग्मं । कीदृक् कं वा जघानामरपतिरभजद् द्यूतदोषः कमुच्चैः ॥ अर्धं किं कं च सभ्याः सदसि विवदिषुं वारयन्ति वः । प्रायः किं वा चरन्ति प्रस्मरतुहिनं वासरं कीदृगाहुः ॥ १ ॥" विपरीतं पद्मं वनदवानलम् ॥ "पुच्छइ लच्छी दईओ । अर्णतरत्थे किमव्वयं होइ ॥ संजोइयक्खरेसुं । को रिज्जए पच्छा ॥ १ ॥" हरो वर्धमानाक्षरजातिभेदः । एवं भिन्नार्थतुल्यश्रुतिपद नं यमकं तदपि पादतदर्धाद्यावृत्त्या नाना- भेदम् । यथा—" रमणो रमणो रमणो । जाओ जूयारियाण असईण ॥ सरणं सरणं सरणं । कह तस्स वयामि दिव्व- हया । १ ॥" ।दिशब्दात्प्रच्छन्न टार्थप्रहेलिकादिग्रहः । " द्वेसणनिउणो । वसणासंगी वि लो तो वि ॥ स - णे पढमरेहं । को लहइ ज म्मि हीणोवि ॥ १ ॥" सूईउ प्रच्छन्नार्था । एवं प्रकटार्थोऽपि परेणान्यार्थत्वेनाभिहित- स्य वाक्यस्यान्यार्थतया कल्पनं छलितं वचनमि र्थः । दिशब्दात्तद्भेद ः । यथा—" तुह वयणं पिच्छन्ती । अ रुइरंपि किंपि न वेए । मुद्धे सहो सुम्मइ । कह पइं दिट्ठो देट्ठीए ॥ १ ॥ " ' वर्जयति ' परिहरति ' नित्यं ' सर्वदा, सकृदप्येतत्क्री ।प्रसंगे विद्यादिवत् शीलत्वापत्त्या श्रावकत्वव्याघातात् । तदुक्तम्—"किड्डाए वट्टन्तो । होइ पमत्तो

य पावए सो य ॥ अंगीकयगुणहाणिं ॥ तेसिं न वाणं भं च ॥ १ ॥ एवं च असुहकम्मं । बन्धइ बद्धं च नेइ परिपोसं । तेण य भवकन्तारे । दुहतरु रे चिरं भमइ ॥ २ ॥ " क्रीडार्थस्य यमकादेर्निषेधेन च देवस्तवाद्यर्थस्य तस्यादुष्टत्वमेवेत्युक्तं भवति । ततः संविग्नेन सुश्रावकत्वार्थिना सर्वा अपि क्रीडास्त्याज्याः । इति गाथार्थः ॥ ३ ॥

अथ शीलभ्रंशहेतुत्वेनानायतनविशेषत्वात्परगृहप्रवेशस्य तद्वर्जनायाह—

तईयं ग्गे , परघरग विवज्जए ए गो । सुन्नेगित्थीसहियं, विसे ओ दोससब्भावा ॥४॥

व्याख्या—तृतीयं स्थानं शीलवत्त्वे एतत् । यत् 'उत्सर्गेण' सामान्येन तावन्निर्निमित्तं 'परगृहगमनं' अन्यसदनप्रवेशं विवि नेकैः रैः र्यान्तरव्यासंगविक्षेपादिभिर्वर्जयति परिहरति 'एषः' सुश्रावकः, तेन सुसहायस्य तत्र ज्ञातसपरिकरतद्गृहपतिस वस्य चात्यन्तिकप्रयोजनेन गमनेऽपि न दोषः । किञ्चित् शून्यं तद्गृहपत्यादिरहितत्वात्, अपरमेकस्त्रीसहितं तदन्याङ्गनाऽभावात्, ततः शून्यं चैकस्त्रीसहितं चेति द्वन्द्वः । ईदृशं गृहं 'विशेषतः' अतिशयेन प्रवेशाय वर्जयतीति योगः । कुतः ? इत्याह—दोषा यथाक्रमं परद्रव्यपराङ्गनाऽभिलापादयोऽपरा स्तेषां सद्भावः कर्मदोषादुद्भवस्तस्मात् । तथा चोक्तम्—" तत्थित्थिं दट्ठूणं । खुब्भिज्ज सयं व सा व भिज्जा ॥ लुब्भेज्ज परधणे वा । उभयम्मि जणो व संकिज्जा ॥१॥ एवं वयनासो से । अयसो बन्धो च होइ धणनासो ॥ हुज्जा च पाणनासो । यासो वा नियजणस्स ॥ २ ॥ " ततः परगृहप्रवेशं वर्जयति । इति थार्थः ॥ ४ ॥

अत्रैव विशेषान्तरमाह—

मयणाउरदिट्ठीए, परजुवइनिरिक्खणं विवज्जेइ । परिहासकहं वज्जइ, एगो एगित्थिए सद्धिं ॥५॥

व्याख्या—मदनातुरदृष्ट्या कामविह्वललोचनेन 'परयुवतिनिरीक्षणं' अन्यस्त्रीदर्शनं 'विशेषेण' अतिशयेन 'वर्जयति' परिहरति, तथा तदवलोकनस्यासदाचारमहाराजप्रधानदूतायमानत्वात् । 'परिहासकथां' च सस्मितनर्मालापरूपाम् 'एकः' एकाकी सन् एकयाऽसहाययैव स्त्रिया योषिता सह वर्जयति । इह च स्त्रीसामान्यमात्रोपादानाद्भगिन्यादिभिरपि सहैकान्तवार्तां न करोति, लोकाशङ्कोत्पादकत्वात् मदनोन्मादस्य दुर्वारत्वाच्च । तदुक्तम्—" मात्रा स्वस्रा दुहित्रा वा । न विविक्तासनो भवेत् ॥ बलवानिन्द्रियग्रामः । पण्डितोऽप्यत्र मुह्यति ॥ १ ॥ " यदा चैवं परस्त्रियो निरीक्षणाद्यपि निषिद्धं तदा साक्षात्तत्सेवायाः शिष्टगर्हितायाः, ततोऽपि गर्हिततमस्य भार्यात्वेन तत्संग्रहस्य कैव कथेति शुद्धशीलाराधकेनावश्यं तन्निरीक्षणाद्यपि वर्जनीयम् । इति गाथार्थः ॥ ५ ॥

एवं कायिकं शीलभेदत्रयमभिधायाऽथ वाचनिकं चतुर्थं शीलभेदमुभयलोकदुःखावहं विकृतवचनाभिधानसहितमभिधास्यन् पूर्वं तावत्तत्प्रत्यनीकं शुभवचनमेवाह—

महुरमणवज्जमणलिय-मबाहयं इह परत्थ हियकारि । वयणं भासइ कज्जे, विकियं परिहरइ जत्तेणं ॥६॥

व्याख्या—'मधुरं' कोमलं अर्थ–ध्वनिभ्यां श्रोत्रानन्दकमित्यर्थः । तदपि 'अनवद्यं' पापारम्भानाबाधकं, तदपि 'अनलीकं'

सत्यं, तदपि 'अबाधकं' परिणामपथ्यत्वात्स्वपरयोर्दुःखानुत्पादकमबाधादं वा । ह्रस्वत्वं प्राकृतत्वात् । पाठान्तरेण त्वबाधितं पूर्वापराव्याहतार्थम्, अत एवेह परत्र हितकारि, एत न्मनि जन्मान्तरे चानुकूलसंपत्तिहेतुः । ईदृशं 'वचनं' वाक्यं 'भाषते' ब्रूते, उत्सर्गतः शीलवान् श्राद्ध इति मः । 'कार्ये' सद्धर्मानुगतप्रयोजने । अनेन निष्प्रयोजनमीदृशस्यापि वच निषेधमाह—तथा 'विकृतं' वक्ष्यमाणलक्षणं वचनमेव 'परिहरति' वर्जयति 'यत्नेन' आदरेण, तदपरिहारे मधुरादिभाषित्वाऽनिर्वाहात् । इति गाथार्थः ॥ ६ ॥

अथ सान्वयं विकृतमेव —

विकि विकारवन्तं, इहपरलोया दो जणयं । ोयदो हेऊ, रे मारियदासवि लत्ति ॥७॥

व्याख्या—'विकृतं' वि मिति लक्ष्यं 'विकारवत्' इति लक्षणम् । तत्र विकारश्चेतसोऽन्यथात्वं, मदमदनमत्सराद्युपप्लुतत्वम् । तद्युक्तं यन्मनस्तद्विकारवत् । तन्निमित्तकं वचनमप्यभेदोपचाराद्विकारवत् । मद भावे तादृग्वचनाभावादिति भावः । तदुक्तम्—" मयणाउरोत्ति मयविं—भलुत्ति मच्छरपउट्ठचित्तुत्ति ॥ जं वयणं वयमाणो । जणेण नज्जिज्ज तं वज्जं ॥ १ ॥ " अथ कार्यमस्याह—इहपरलोकयोर्दो जनकं, तत्रेहलोकदोषा त्मलघुताजनविरोधबन्धन प्राणनाशादयः, परलोकदोषाः गतिपातादयस्तेषामुत्पादकं उभयलोकबाधकमि र्थः । तत्रापीहलोकदोष नकं एतजन्मनि दूषणोत्पादकम् । किम् ? इत्याह—' रे मारित दास वृ इति '। परलो ।धकं त्वग्रे वक्ष्यत इत्यभिप्रायः । तत्र 'रे' इति निन्दार्थे संबो-

घनम् । मारितो विनाशितस्त्वं मया अन्येन वेत्याक्रोशवचनम् । दासोऽङ्कपतितः कर्मकरः, वृषलो हीनजातिरित्येतावप्याक्रोशविशेषौ । इतिशब्दः सामान्याक्रोशप्रकारसमाप्त्यर्थः । इति गाथार्थः ॥ ७ ॥

अथ विशेषतस्तानभिदधानस्तत्फलमप्याह—

रे असुयपुत्त ! माइय, माया ते एरिसी कया हुज्जा । एवं खरफरुसहओ, मारिज्ज व तं दुभासिल्लं ॥८॥

व्याख्या—' रे ' इति पूर्ववत् । अश्रुतस्य लोके जनकत्वेनाप्रतीतस्य पुत्रः सूनुरश्रुतपुत्रो जारजात इति यावत्, तस्यामन्त्रणम् । अथवा हीनजातिं कञ्चन जनकं कटाक्षीकृत्य वक्ति, अमुककपुत्रः अमुकस्य पुत्रस्त्वमिति । इह च रेशब्दस्य अश्रुतपुत्रशब्देन समभिव्याहृतस्यात्यन्तदुःखोत्पादकत्वख्यापनार्थत्वान्न पौनरुक्त्यम् । तथा ' माइय ' इति मा स्म त्वमागा इत्याक्रोशः । अथवा मातृगो जननीप्रतिसेवकः । तथा 'माता' जननी ' ते ' तव मयाऽन्येन वा ' ईदृशी कृता भवेत् ' प्रतिसेविता संपादिता स्यात् । अथवा या माता ते भवादृशस्य दुष्पुत्रस्य जनयित्री सा कदेदृशी भवेत् सती ? स्यान्न कदाचिदित्यर्थः । एतद्भाषणफलमाह—' एवं ' उक्तन्यायेन खरैर्गाढैः शब्दतः परुषैश्चाश्राव्यैरर्थतो हतोऽन्तर्मर्मण्यथितः सन् श्रोता शक्तिमान् ' मारयेत् ' विनाशयेत् । वा शब्दो विकल्पार्थः । तेन तथाशक्त्यभावे खरपरुषतरैः प्रतिहन्याद्वा तं दुर्भाषावन्तं पुरुषमिति गम्यते । अस्त्यर्थे इल्लः प्राकृतः । इति गाथार्थः ॥ ८ ॥

एवं च दुर्भाषावानिति दर्शनार्थं पुनः पुरुषं प्रकारान्तरेणाह—

एसो चोरो जारो, निही लद्धो इमेण निब्भंतो । एसो रायविरोही, मांसक्खाई इमो सो ॥ ९॥

व्याख्या—वस्तुतस्तथात्वे सत्यसत्यपि । ' एषः ' पुरुषः ' चौरः ' परद्रव्यापहर्ता, 'जारः' उपपतिः, ' निधिश्च ' रत्नादिभृतः कलशः ' लब्धः ' प्राप्तोऽनेन ' निर्भ्रान्तः ' निःसन्देहः । च निःसन्देहत्वस्य क्रियाविशेषणत्वेऽपि लभ्यलाभयोरभेदोपचाराभिधिविशेषणत्वेनोपादानमिति । ' एष राजविरोधी ' च नृपविरुद्धाचरणशीलः । नृपयोर्वा विरोधकः, परोक्षे दो हयं मांसमिह मांसशब्देन विवक्षितम् । तेन ' मां दी ' पैशुन्यभाषी ' सः ' इति प्रत्यक्षनिर्देशः । पुनः पुनरेतच्छब्दाद्युपादानमत्यन्ततिरस्कारार्थम् । शब्द एवकारार्थो भि श्च । तेन चौर एवायं, र एवायमि ।दि योज्यम् । इति थार्थः ॥ ९ ॥

।पि फलमाह—

तेहि व तन्नियगेहि , मारिज्जइ गो वि दुक्खमारे । अवरोवि इमो, भेओ इह कियवयणम्मि ॥

व्याख्या—' तैर्वा ' चौरजारादिरूपतया क्रुष्टैर्वा ' तन्निजकैर्वा ' त्क्रुष्टज्ञातिभिर्वा तत्पक्षपातिभिः, वाशब्दौ तुल्यमारकत्ववि पार्थौ । ' मार्यते ' व्यापाद्यते, 'सोऽपि' प भाषावानपि, न केवलं पूर्वोक्तदुर्भाषावानित्यपिशब्दार्थः । कथम् ? इत्याह—' दुः रेण ' जिह्वाछेदवक्रसेवनलोह ल स्यभेदादिना ति ःखोत्पादकव्या दनेन, तेन भाद्यो नेदृशं मपि भाषत इति भावः । थवेति प्रकारान्तरद्योतनार्थः ' परोऽपि ' पूर्वोक्तादन्योऽपि ' ' वक्ष्यमाणः

'भेदः' विशेषो वर्जनीयतया 'इह' शीलवत्त्वप्रक्रमे 'विकृतवचने' विरूपकभाषणविषये संभवतीति शेषः । इति गाथार्थः ॥ १० ॥

तमेवाह—

पाविट्ठा रायाणो, दसवेससमत्ति जं सुए भणियं । रायगुरू सुरपाई, दासीए पई गुरू कह णु ॥११॥

व्याख्या—'पापिष्ठाः' पापीयांसो 'राजानः' नृपाः । कुतः ? इत्याह—'दशवेश्यासमाः' पापनिधानत्वेन दशशूच्चरिकातुल्या इति । एतद् 'यद्' यस्मात् 'श्रुते' आगमे स्मृत्यादौ 'भणितं' उक्तं मन्वादिभिरिति गम्यते । तथा चागमः—"दशशुनासमं चक्रं, दशचक्रसमो ध्वजः । दशध्वजसमा वेश्या, दशवेश्यासमो नृपः ॥ १ ॥" अत्र चक्रं तिलपीडनयंत्रं तद्योगात्तैलिकोऽपि । तथा ध्वजयोगाद् ध्वजः कल्पपालः, तद्गेहे हि चिह्नार्थं दक्षिणापथे ध्वजो बध्यत इति कृत्वा । तथा 'राजगुरुः' नृपपूज्यपुरोहितादिरप्ययं, 'सुरापायी' मद्यपः, 'दास्याः पतिः' अगम्ययोषिद्भर्त्ता च । अतो 'गुरुः' पूज्यः 'कथं नु' इति केन प्रकारेण संभाव्यते ? दोषाकरत्वात्वान्नैव । इति गाथार्थः ॥ ११ ॥

अथेहलोकबाधकान्युपसंहरन् परलोकबाधकान्याह—

एमाइ कुलच्छायग-वयणाणि विरुद्धयाणि विगियाणि । परलोगवाहगाणि उ, न जिणो धम्मो न निव्वाणं

व्याख्या—'एवमादीनि' एतत्प्रभृतीनि । वकारलोपो विभक्तिलोपश्चात्र प्राकृतत्वात् । आदिशब्दान्नृपभार्या स्वैरिणी,

नृपपु ` वा पारदारिक इत्यादिग्रहः । कुलाच्छादकानि, नैते कुलजाता एवं भाषन्ते, तस्मान्न इमे तत्कुलजा नूनमन्यजातत्वादकुलीना एवेति । पाठान्तरेण तु कुलोच्छेदकानि समस्तगोत्रध्वंसहेतुत्वात्, तानि च तानि वचनानि चेति कर्मधारयः । 'विरुद्धकानि' वि न्येव विरुद्धकानि, लो ोकोत्तरमार्गयोरिहलोकपरलोकयोश्च विरोधभाञ्जि तदुघातकत्वात् । किमिति ? अत आह—'विकृतानि' विकारवन्ति । एवं तावदिहलोकबाधकान्युक्तानि । 'परलोकबाधकानि तु' जन्मान्तरबाधाधायकानि पुनः, न जिनो, न धर्मो, न निर्वाणमस्तीति शेषः । सर्वथा रागादिजेता जिनः सर्वज्ञो नास्ति, अत्यक्षादिभिरनुपलभ्यमानत्वात् । धर्मोऽपि पूर्वोदितस्वरूपो नास्तीत्यनुपज्यते, तदुपदेष्टुः सर्वज्ञस्याभावात् । नैव 'निर्वाणं' कृत्स्नकर्मक्षयलक्षणा निवृत्तिस्तदुपायस्य धर्मस्यैवाभावात्, एवमादीनीत्यत्रापि संबध्यते, तेन न पापं नापि तत्फलमित्यादिग्रहः । एतानि हि मिथ्याभिनिवेशादिप्रभवत्वाद्दुर्गतिहेतुत्वाच्च परलोकमेव ं बाधन्ते, तेन परलोक एव बाधाविधायीनीति परलोकबाधकानि, न त्विहलोकेऽपि मारणादिनिमित्तानीति । सर्वाणि च विकृतवचनानि लोकविरागस्वलघुतादिनिमित्तत्वाद्धर्मार्थकामध्वंसकत्वाच्च वर्जनीयानि । तदुक्तम्—"विगियवयं वयमाणो । विसिट्ठलोओ विरज्जए सज्जो ॥ तत्तो सो असहाओ । असहाओ अत्थकामाणं ॥ १ ॥ तेहिं रहिओ गिहत्थो ॥ दुत्थावत्थोत्ति कत्थवि य अत्थं । न जणे जणयइ तम्हा । विकियवयणं विवज्जिज्जा ॥ २ ॥" इति गा र्थः ॥ १२ ॥

अथ विकृतवचनपरिहारफलमुपदर्शयन्नुपदेशमाह—

एमाइवयणपरिव-ज्जणेण जं विकियवयणपरिहारो। इह परलोगे य सुहा-वहोत्ति ता तत्थ सो जयए ॥

व्याख्या—'एवमादिवचनपरिवर्जनेन' उभयलोकविरुद्धादिभाषितत्यागेन 'यद्' यस्माद् 'विकृतवचनपरिहारः' भ्यभाषणत्यागः 'इह' इति अत्र जन नि 'पर ोके च' जन्मान्तरे 'सुखावहः' भावहो वा यथाक्रमं धर्मार्थादिहेतुत्वेन स्वर्गादि त्वेन चेति भावः। इह च सदोषवचनवर्जनस्य हेतुत्वेना वादं कृत्वा प्रस्तुतविकृतवचनपरिहाररूपस्य शीलव भेदस्य सुखावहत्वं विधीयत इति न पौनरुक्त्यम्। इति ब्दो हेत्वर्थस्तेन यतोऽयं सुखावह त्तः त्कारणात् 'तत्र' विकृतवचनपरिहारे 'सः' इति ीलवान् ो 'यतते' यत्नं र्यादिति। एत त्नवतो हि मधुरादि षित्वनिर्वाहसर्थसिद्धेरिति। तदुक्तम्—"इय वय ामयपरिसेय। मियनीसेसचित्तसंतावा॥ र्णदिया य ाणं। जणा पडिच्छंति दंती य॥ १॥ एवं अत्थो कामो। धम्मो य पवन्नवयसरूवो से॥ संसिज्झइ नियमेणं। जसो य धवलेइ भुवणयलं॥२॥" इति थार्थः ॥ १३ ॥

एवं विकृतवचनाभिधानसहितं वाचनिकचतुर्थ ीलभेद भयलोकदुः वहमुक्त्वाऽथेहलोकदुः। विकृतवेषाभिधा हितं कायिकं प शीलभेदमाह—

नियभूमि ाणुरूवो, वे गो । चिउ । रि हग्घा रणो, वि कह सिडिंगागिई होइ ।१४।

व्याख्या—'निजभूमिगानुरूपः' त्रि णिगादी शनी र ानुत्सववद् युवस्थविरादि पद चितः ' ः'

नेपथ्यं 'सुश्राव णां' विशिष्टश्रमणोपासकानां 'उचितः' संगतो : परिधातुमिति शेषः । 'इति' तस्माद्धेतोः ' रं' केवलं 'महार्घाभरणोऽपि' महामूल्याल ारोऽप्यास्तां तदन्यः, 'कथं' केन प्रकारेण 'पिङ्गाकृतिर्भवति' पिङ्गाकृतिहेतुत्वात् पिङ्गाकृतिर्विटा रापादकः स्याद्वेषः पुरुषो वा। कथं पिङ्गाकृतिः स्यात? नैवेत्यर्थः । न हि महार्घाभरण त्वादिकं षिड्गत्वापादकम्, अपि तु वक्ष्यमाणशैलूषाद्युचितवेषत्वम्, तदभावे तु प्रधानतरोऽपि वेषो न दुष्यति ॥ इति गाथार्थः ॥ १४ ॥

' परिहरणीय ख्यापनाय विकृतवेषं दूषयन्नाह—

कुलदेसाण विरुद्धो, वेसो रन्नो वि णइ नो ोहं। वणियाण विसेसेणं, विसेसओ ताण इत्थीणं ॥१५॥

व्य ा—' देशयोः' गोत्रराष्ट्रयोः 'विरुद्धः' अनुचितः 'वेषः' नेपथ्यं, तत्र कुलविरुद्धो यथा–ब्राह्मण- त्रियादिकुले नीलीरक्तवस्त्रपरिधानं श्वेतादिवस्त्रपरिधानमपि वा लंखाद्याकृत्यापादकम्, देशविरुद्धो यथा सिन्धुदेशे शिरोवेष्टनविरहः काशीदेशे वा तद्विधानम्, ईदृशो वेषो 'राज्ञोऽपि' सकललोकमान्यस्य भूपस्याप्यास्तां तदितरस्य 'न करोति' न विधत्ते 'शोभां' श्रियं, 'वणिजाम्' नैगमानां 'विशेषेण' तिशयेन, न करोति शोभामिति योज्यम्, राज्ञः, ।शात्तेषां लघुत्वात्, तत एव विशेषतः 'तत्स्त्री ाम्' वणिग्योषिताम्, यदा च सामान्येनैव शिष्टवणिगादीनामेव तदा तरां श्रुतजगत्त्रयाविगानविश्रुतार्हतश्रुतानां श्रावकश्राविकाणामिति भावः । इति गाथार्थः ॥ १५ ॥

अथ सुश्रावकाणामधिकृतं वेषमाह—

संतलयं परिहाणं, ज्झलंबचोडाइयं च मज्झिमयं। सुसिलिट्ठमुत्तरीयं, धम्मं लच्छिं जसं कुणइ ॥१६॥

व्याख्या—'सन्तलकम्' बन्धेन विशेषवद्, यत्र परिहितपरिधानप्रान्तेनैव कच्छां दत्त्वा पुनः सङ्कोचितेन कटीवेष्टनं कृत्वा पश्चाद्भागे बन्धो दीयते, पूर्वं वाऽग्रभागे बन्धं दत्त्वा पश्चादञ्चलान्तरेण कच्छा दीयते मल्लादिवत् तत्सन्तलकं कच्छयाऽभिधीयते, एतच्चाग्रतः पश्चाच्चाप्रलम्बमानप्रान्ततया न विभूषाविशेषहेतुः स्यात्ततोऽनेनान्यदपि यत्तादृशं तदुपलक्ष्यते तेन सन्तलकसदृशम्, 'परिधानम्' अधोनिवसनम्, ज्झलंबं श्लथं चोलः परिधानं तदतिगच्छत्यतिक्रामति 'चोडातिगम्,' परिधानोपरितनप्रान्तातिक्रान्तम्, ततो ज्झलम्बं च तच्चोडातिगं चेति कर्मधारयः, 'चः' समुच्चये 'मध्यमकम्' सकलबाहुपृष्ठोदरादिमध्यमाङ्गाच्छादकमङ्गिकालक्षणं द्वितीयं वस्त्रम्, तथा 'सुश्लिष्टम्' अतलिनम् 'उत्तरीयम्' उपरितनमाच्छादनवस्त्रमेतद्विधिना परिधीयमानम् 'धर्मम्' पुण्यम् 'करोति' विधत्ते शास्त्रीयसदाचारत्वात् स्वपरयोर्मदनानुद्दीपकत्वाच्च, 'लक्ष्मीम्' श्रियं चालघुतापादकत्वाज्जनानुरागहेतुत्वाच्च, 'यशः' कीर्त्तिं च शिष्टतानिदानत्वादनुपहास्यत्वाच्च, करोतीत्यनुषज्यते, एवं चास्य वेषगुणवत्तोपवर्णनवाक्यस्य साक्षात्प्रवृत्त्यनभिधायकत्वेऽपि परिणतिसुरसमाम्रमिति वाक्यवत्प्रवृत्तौ तात्पर्यम्, तत एवंविधो वेषो विधेय इति भावः। इति गाथार्थः ॥ १६ ॥

अथ सुश्राविकाणां गाथाद्वयेन तमाह—

परिहा मणुब्भड, चलणकोडिमज्जायमोसरं । परिहाण तो, कंचुओ होइ सिलिट्ठो॥१७॥
पच्छायंतं अंगं, सुसिलिट्ठं उत्तरिज्ज णुरूवं । विकियं तव्विवरीयं, वज्जइ जिणभवणमाईसु ॥ १८ ॥

व्याख्या—'परिधानम्' निवसनम् 'अनुद्भटमेव' अकृतभङ्गिविशेषबन्धनमेव, अनुस्वाराश्रवणं प्राकृतत्वात् 'चलनकोटिमर्यादाम्' पादाग्रसीमाम् 'ओसरंत'ति प्राप्नुवत् 'तुः' अवधारणार्थो योजितश्च, तथा परिधानं निवसनमामंश्चतुर्भिरङ्गुलैराच्छादयन्, उपलक्षणं चैतत्–बाहू अपि करपर्यन्तमाच्छादयन्निति दृश्यम् । 'कञ्चुकः' अङ्गिकारूपो भवति । 'सुश्लिष्टः' घनवानादिद्यूत इत्यर्थः । अनेनातिसूक्ष्मवस्त्रमयत्वं निषेधति । 'आच्छादयत्' प्रकर्षेणादृश्यतां नयत् 'अङ्गं' शिरःप्रभृति पादपर्यन्तम् । अनेन संपूर्णस्यैव पटस्य प्रावरणौचित्यमाह, न तु तदर्द्धस्य, तस्य सकलाङ्गानाच्छादकत्वात् । 'सुश्लिष्टम्' अतिनिबिडं, न तु मङ्कणकादिवदतिसूक्ष्मम् । 'उत्तरीयम्' उपरितनवस्त्रम्, 'अनुरूपम्' उचितं भवति, पूर्वोक्तधर्मादिगुणाबाधकत्वात् श्राविकाणामिति प्रक्रमः । यदि तु कदाचित्तलिनवसनाच्छादनमपि क्रियते तदा द्वितीयवस्त्रेणैव सह न केवलमिति भावः । एवमुभयेषामप्युचितं नेपथ्यमभिधाय विकृतं तदभिधित्सुः पीठमारचयति । 'विकृतं' विकारवत्, मदनोद्दीपकत्वात् शिष्टोपहास्यत्वाच्च । 'तद्विपरीतम्' उक्तादन्यादृशं नेपथ्यमिति प्रक्रमः, 'वर्जयति' परिहरति श्रावकादिः । तथा चोक्तम्—"वेसेण जेण दिट्ठेण । सिट्ठलोओभिमन्नए मणसा ॥ नूणं एस सिडिंगो–त्ति तं विवज्जिति धम्मिट्ठा ॥ १ ॥" विशेषतश्चाह 'जिनभवनादिषु' अर्हदायतनसाधूपाश्रयगमनप्रभृतिषु विशेषेण वर्जयतीत्यर्थः,

ि त्रापि रिहार्यत्वाद्विशे श्रैत्यादौ, तत्र हि केव ध र्थप्रवृत्तेः, विकृतवेषस्य कामादि कत्वेना -
हेतुत्वाि परिहारः । इति गा र्थः ॥ १७-१८ ॥

थ विकृत माह—

परिहा , सइ देहं तहंगिया । सिरवेढो रेणं, वे ो एसो सिडिं ॥ १९ ॥

व्याख्या—'ल स्येव' शैलूषस्येव 'परिधानं' निवसनं यत्रेति शेषः, स ग्र गपश्च ागयोः प्र म ानं - स्तोरु ण्डमत्यन्तमाकृष्य च परिधत्ते । नेन च सन्त कपरिधा यैताद्विपरी वरूप ावि तता य प्रति - दिता भवति, एवमुत्तरयोरपि द्रष्टव्यम् । तथा 'ग्रसत इव' गाढा परिहिततयाऽऽत्मसात वर्तीव 'देहं' िरं, 'त ' इति ार्थोप पार्श्वों योजितश्च, ' ङ्गिका ' ीता, ो ग्र ? यतो 'ग ा' शरीरे निबिडसम्बन्धवती तद्- भेदवती चेत्यर्थः । 'शिरोवेष्टः' म कव विशेषः 'टमरे ' इति वि णे तृतीया, शिरोवेष्टप्रान्तस्य विंच्छि - वि पवत ऊर्ध्वीकृत्य बन्धनरू मर विशिष्टः शिरोवेष्टो यत्रेति, 'वेषः' नेपथ्यम् 'एषः' ईद ो विकृतः 'षि ानां' ि ां, न शि ां भवतीति गम्यते । उपलक्षणं चैतत्—तेनान्यदपि य ःस्थ के ापनयनं रोम्णां रेखामा- त्राकारतया धा तदपि ि त्वापादकं विकृत बोद्धव्यम् । चैवं विषनिन्दाव सा ञ्चिवृत्त्यनभि - त्वेऽपि परिधा सं समिति व वञ्चि त्तौ तात्पर्यम् । एवमुत्तरवि पि स्त्रीवेषनिन्द तात्पर्यं बो म्,

ईदृग्वेषः परिहार्य इत्युपदेशः । इति गा र्थः ॥ १९ ॥

गा ेण स्त्रीणां तमाह—

आसिलिट्ठु नीविबंधो, चू ंफुसइ यनहरेहं । जंघद्धं उग्घाडं, परिहाणं हवइ वे णं ॥ २० ॥

सिहि । मग्गदेसो, ग्घाडो नाहिमंडलं तह य । पासा य अद्धपिहिया, कंचुओ सहइ वेसाणं ॥२१॥

ंकुमरस ॅ रियं, अंगं ाऊ गहिय आहरणं । ंकण पाउयंगी, कुलवहु कह जाउ जिणभवणे ॥

व्याख्या—' अश्लिष्टः ' अतिशिथिलः ' नीविबन्धः ' निवसनग्रन्थिबन्धः, तथा ' चूडा ' निवसनाग्रकलापः ' संस्र ति ' आमृशति ' पादनखरेखां ' चरणनखाग्रभागं, विच्छित्तिविशेषबद्धत्वेन प्रलम्बमानत्वात् । पश्चाद्भागे ' जङ्घार्द्धं ' लोकरूढपिण्डिकार्द्धम् ' उद्घाटं ' प्र ं यत्र तदिति शेषः ' परिधानं ' निवसनं ' भवति ' स्यात् ' वेश्यानां ' द्व्यचारिकाणां, न तु ाङ्गनानामिति भावः । तथा ' सिहिनाणं 'ति स्तनानां ' मार्गदेशः ' वक्षःस्थलप्रदेशः ' उद्घाटः ' ो येनेति शेषः । ' नाभिमण्डलम् ' उदरकूपिका च तथाऽना मित्यर्थः । ' पार्श्वौ ' उदराधःप्रान्तावपि । अर्द्ध-पिहितौ' ाच्छादितौ ौ ' कञ्चुकः ' ीतः ' सहते ' शोभते वेश्यानामिति पूर्ववत् २१ । तथा ' कुङ्कुमरसपिरितं ' कश्मीरजद्रवपिञ्जम् ' अङ्गम् ' वदनादिचरणपर्यन्तसकलशरीरं ' कृत्वा ' विधाय, अनेन च —हस्तमात्रस-

मालभनस्याऽवैधव्याभिव्यञ्जकस्यानिषेधमाह । 'प्रथिताभरणं' बद्धालंकरणम्, आभरणं तिलकादिनूपुरपर्यन्तं समस्तमलंकरणम्; अनेनापि कण्ठ–कर्ण–प्रकोष्ठाद्याभरणस्य समर्तृकायोग्यस्य इतरस्याप्यनुद्भटस्याऽनिषेधमाह । अथवा एवं सकलमाभरणं गृहीत्वा 'मङ्कणकप्रावृताङ्गी' देशविशेषोद्भवसूक्ष्मवस्त्रभेदाच्छादितशरीरा, मङ्कणकाभिधानं तथाविधाऽतिसूक्ष्मवस्त्रोपलक्षणार्थं, ततोऽतिसूक्ष्मवस्त्राच्छादिताङ्गीत्यर्थः । 'कुलवधूः' कुलाङ्गना 'कथं' केन प्रकारेण 'यातु' गच्छतु जिनभवने ?, उपलक्षणत्वाच्चाऽस्य साधूपाश्रये च ? नैवेत्यर्थः । निराभरणेऽपि शरीरे एवंविधाच्छादने प्रकटावयवत्वेन मदनोद्दीपकता स्यात्, किं पुनः सकलाभरणतेति, तेन विशेषतस्तत्र सूक्ष्माच्छादननिषेध इति भावः । एतेन यद्येवंविधवेषा चैत्यादौ न याति, तर्हि कृतरण्डावेषा कुलाङ्गनापि यातु, इत्यादि जिनमतरहस्यानभिज्ञानां दुर्विदग्धानां सोल्लुण्ठभाषितं परिहृतमवसेयम्; मदनोद्दीपकतयाऽनुचितस्यैव निषेधात्, तदितरस्य तु जिनभक्तिविशेषाभिव्यञ्जकस्य विशिष्टतरस्याप्यनुज्ञानात् । इति गाथात्रयार्थः ॥ २०–२१–२२ ॥

उपसंहरन्नाह—

तम्हा विलयं वेसं, परिवज्जइ सावओ किमच्छरियं ?। नवरं सुसाविया उ, दुन्नियच्छं वज्जयंतीउ ॥

व्याख्या—यस्माद् विकृतवेषः कामोद्दीपन–लघुताद्यापादकः, तस्माद्धेतोर्विकृतं—विकारवन्तं शैलूषाद्युचितं 'वेषं' नेपथ्यं 'परिवर्जयति' परिहरति 'श्रावकः' श्राद्धः 'किमाश्चर्यं' किं चित्रम् ? न किञ्चिदित्यर्थः । सद्गुरुभ्यः

सम्यक् श्रावकसामाचारीश्रोता हि तामनुतिष्ठन्नेव श्रावक उच्यते, ततस्तस्य तत्परिहारे न किञ्चित् कौतुकमिति भावः । ' नवरं ' केवलं विशेषतश्चेति यावत् । सुश्राविकाः—प्रवरश्रमणोपासिकाऽङ्गनाः दुर्नेपथ्यं—वेश्याद्युचितविकृतवेषं वर्जयन्ति-परिहरन्त्येव, ' तु ' शब्दोऽवधारणार्थः । अथवा श्रावकवत् श्राविका अपि परिहरन्त्येव तम् , न तत्र कौतुकम् ; नवरं सुश्राविकाः पुनः ' दुन्नियच्छं' ति दुर्निवसितं—दुष्परिहितं वर्जयन्ति । अत्र पक्षे ' तु ' शब्दः पुनरर्थो योजितश्च, तेनाऽनुद्भटत्वादिगुणोपेतमपि परिधानम लक्ष्यपरस्परानुस्यूतमेव परिदधति । तथा सुश्लिष्टमपि कञ्चुकमनाकृष्टमेव, महदप्युत्तरीयं ललाटाद्यावारकमेव, महार्घमप्याभरणं मुहुर्मुहुरप्रकाशितमेवेति काश्चिन्मन्दधर्मवासनाः श्रावि अपि नैवमुपलभ्यन्ते, अतः सुश्राविका इत्युक्तमिति गाथार्थः ॥ २३ ॥

कायिक-वाचनिकानभिधाय अथाध्यात्मिकं षष्ठं शीलमेदम —

अदुराराहत्तं पुण, छट्ठं अंगं सीलवत्तम्मि । परियणसयणमहायण, अणुकूल तिहिं पि करणेहिं ॥

व्याख्या—' महाप्रयत्नप्रसाधितप्रयोजनशतैरपि यो नाराध्यते—न प्रसाध्यते स दुराराधः, तद्विपरीतोऽदुराराधः, तद्भावोऽदुराराधत्वं सुखाराध्यत्वमित्यर्थः । ' पुनः ' शब्दो विशेषणार्थः । षष्ठमङ्गम् अवयवो भेद इत्यर्थः, शीलवत्त्वे प्रक्रान्ते इत्यर्थः । ' सीलवत्तम्मि ' इति च षष्ठ्यर्थे सप्तमी । अथवा अङ्गं कारणं शीलवत्त्वे प्रक्रान्त एव । कथमस्य शीलाङ्गता ? इति चेत्, उच्यते—दुराराधस्य हि रोषाद् वधादिप्रवृत्तौ धर्मादिध्वंसकत्वात् । तदुक्तम्—" सयणेण परियणेण

य, कए वि कज्जे महापयासेण । न दुराराहो तुस्सइ, दुस्सइ किय दूसणविगप्पा ॥ १ ॥ सो य असंतोसाओ, फरुसं भासेइ करेइ य वहाई । एवं धम्मो नस्सइ, कामत्थजसा वि य कमेणं ॥ २ ॥" ततः किम् ? इत्याह—'परिजनो' भृत्यादिः, 'स्वजनः' पितृव्यादिः, 'महाजनो' नगरप्रधानलोकः तेषु, 'अनुकूलो' दक्षिणः तद्वचनाद्यनुवर्तनेन तच्चित्ताह्लादकः स्यादिति शेषः । श्रावक इति प्रकृतम्, 'त्रिभिरपि करणैः' कार्यसाधकतमैर्मनोवाक्कायैः, न वचनमात्रेणैवेति भावः । दुराराधत्वस्य हि दोषशताकुलत्वमाकलय्य तत्प्रतिपन्थिनि सुखाराध्यत्वे सकलपुरुषार्थः साधकतामयति । तदुपायश्च परिजनाद्यानुकूल्यमिति शीलधर्मार्थिना तत्राऽप्यवश्यं प्रवर्तितव्यमिति रहस्यमिति गाथार्थः ॥ २४ ॥

दोषाम्भोधरजालवायुपटली सौजन्यवन्यामधु, पैशुन्योद्धतपांसुवारिनिकरः शालीनताश्रीगृहम् ।
निःशेषामलधर्मकर्मकमलाविर्भावलीलासरः, पुण्यैः कस्यचिदुल्लसत्यलमदः श्रीशीलवत्त्वं हृदि ॥१॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकवृत्तौ
शीलवत्त्वद्वितीयस्थानकविवरणं समाप्तम् ॥

अथ गुणवत्त्वनाम ीयं स्थानकम् ।

तं शी त्वं द्वितीयं स नकम् । थ तस्मिन् सत्येव श्रावकस्य णवत्त्व पजायते, इति तदनन्तरं तत्प्रधान - र्थभूतं प ारं वत्त्वमाह—

गुणवत्तं पंचविहं, त्तरुई चेव तह अत्थरुई । भिनिवेसी तहा, करणरुई अणिट्ठिउच्छाहो ॥१॥

व्याख्या—' णवत्त्वं ' प्रागु ार्थम्, ए विशिष्ट कर्मक्षयोप मसाध्यम् । त माऽव्यभिचारितत्पूर्व-कालावश्यंभाविसूत्ररुच्यादिमत्त्वमपि अभेदोपचाराद् गुणवत्त्वमुच्यते । तत् ' प विधं ' पञ्चप्रकारम् । तदेवाह—' सूत्रं ' र्थविशेषसूचकत्वादिलक्षणम् । यदुक्तम्—" सूयणमित्तं सुत्तं, सुइज्जइ केवलो तहिं अत्थोत्ति । जं पुण से वक्खाणं, आयरिया परिकहन्ति " ॥ १ ॥ अथवा लघूनि चितार्थानि स्वल्पाक्षरपदानि च सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः, पुरुषविशेषप्रणीतत्वलक्षणं वा सूत्रम् । तदुक्तम्—" सं गणहररइयं, तहेव पत्तेयबुद्धरइयं च । सुयकेवलिणा रइयं, अभिन्नदसपुव्विणा रइयं ॥ १ ॥ " तत्र सूत्रे-ग्रन्थे रुचिः-श्रद्धा ाण्यप्रतीतिः, यस्याऽस्ति स सूत्ररुचिः श्रावकः, गुण-गुणवतोरभेदोपचाराच्चेह स एव गुणवत्त्वमुच्यते, र्थरुच्यादिष्वपि । ' एव ' शब्दोऽवधारणे, तेन शेषसर्वरुचीनां रणर ाद्यत्वादयमेवैको गुणवत्त्वमित्यर्थः । ' चः ' समुच्चये, स च गाथान्ते ेज्यः । तथा चेति समुच्चये, र्थे— -

स्याभिधेये रुचिर्यस्यासौ अर्थरुचिः । तथाऽभिनिवेशो वितथेष्वपि स्वज्ञानेषु अनुष्ठाने वा सत्यत्वाग्रहः, स विद्यते यस्यासौ अभिनिवेशी, तादृशो यो न भवत्यसौ अनभिनिवेशी, प्रज्ञापनीय इत्यर्थः । चः समुच्चये, तथेति प्रकारान्तरोपक्षेपार्थः । करणे सूत्रोक्तानुष्ठानविधाने रुचिर्यस्यासौ करणरुचिः । तथाऽनिष्ठितोऽनवच्छिन्न उत्साहः करणाभिलाषातिशयो यस्यासौ अनिष्ठितोत्साहः स चेति । सर्वत्र चात्रैवं क्रमोपन्यासकारणं वक्ष्यामः । इति गाथार्थः ॥ १ ॥

तत्रादौ तावत् समस्तार्थरुच्यादिगुणवत्त्वमूलभूता सूत्ररुचिः, तस्या अप्यर्थरुचिशून्याया अकिञ्चित्करत्वात् तदनन्तरमर्थरुचिं चाह—

सुत्तं जिणिंदसमए, जं जं रुच्चइ तदेव एयस्स । पुणरुत्तं पुच्छाए, अत्थं निस्संकियं कुणइ ॥ २ ॥

व्याख्या—' सूत्रं ' पूर्वोक्तशब्दार्थं ' जिनेन्द्रसमये ' तीर्थकरसिद्धान्तविषये, ' यद्यद् ' इति वीप्सया सर्वं संग्रहमाह, तेनाऽर्थतस्तीर्थकरैर्य उपदिष्टः सिद्धान्तः सूत्रतस्तु गणधरैर्ग्रथितः । तदप्यव्यभिचार्यर्थाभिधायकं यद्यद् अङ्गानङ्गप्रकीर्णकादिकं रोचते—भव्यतया प्रतिभासते तदेव जैनसूत्रमेव, न तु कपिलादिप्रणीतमपि एतस्य सूत्ररुचेः श्राद्धस्य । यथाहि कश्चित्कामुकः कस्याञ्चित् कान्तकान्तायामत्यन्तासक्तस्तद्वदनारविन्दमेवाऽनवरतमवलोकयति, श्लाघते, ध्यायति च; तथैषोऽपि श्राद्धः सूत्ररुचेः सकाशात् तदेकाग्रमनाः सन् तदेव सूत्रममृतमिव मन्यमानः पठति च गुणयति च शृणोति च । किं बहुना ? तन्मय एवास्ते, अन्यथा सूत्ररुचित्वस्यैवाऽनुपपत्तेः । तदुक्तम्—" पढइ गुणेइ सुणेइ य, उचियं

अंसेसु पंच निउणं । निउणमणवग्गहेणं, गेण्हंतोति मग्गणो ॥ १ ॥" सोऽस्य कथमतन्त्रतोति चेत्? उच्यते— प्रमाणादिकथायाभिधायकत्वेनाप्युपगमात् । तत्र हि प्रकृतीश्वरादयः पदार्थाः प्रतिपाद्यन्ते, ते च निचार्यमाणाः प्रमाणो-पपत्तिभ्यां नोपपद्यन्ते, यथा च नोपपद्यन्ते तथा सम्मत्यादिग्रन्थेभ्योऽवसेयम् ; अत्र तु ग्रन्थगौरवभयान्नोच्यते इति । अतोऽसमीचीन-तत्त्वाभिधायकत्वात्, कथं च तदभिधायकं शास्त्रं तन्त्रम् ?, असदभिधायकत्वेन तत्त्वाभिधानात् । तस्मात् शेषं सूत्र-स्याविति वृत्तिरिह निश्चितं न प्रकारेण तदेकान्तवादकारि सूत्रे, अन्यथा किमनेन स्वतन्त्रत्वात् ? इत्यर्थः । तदेवं कार्यद्वारेण प्रवर्तनं व्याख्याय तदनन्तरमर्थकथनमपि कार्यद्वारेणैवाह—' पुनरुक्तं ' पौनःपुन्येन पुनरुक्तया प्रश्नेन हेतुभू-तया अर्थं सूत्राभिधेयं गुर्वादिभ्यः श्रुतं सन्तं ' निःशङ्कितं ' निःसंदेहं करोति विधत्ते च. सोऽर्थकथितिरिति व्यापारः । न हि समयविदः कार्येषु समीचीनप्रवृत्तिनिबन्धनतया अर्थमप्यानृतं मन्यमानस्तत्राऽत्यादरवत्त्वेन तं समाकर्णयन् सान्ने-ऽपि संदेहे मुहुर्मुहुः पृच्छति. मा भूत् कार्थिन्यार्थसंदेहादन्यथा प्रवृत्तिरिति बुद्ध्या । तदुक्तम्—" सुत्तत्थे निउणो, संतो कज्जेसु थगुणिमगुपत्तो । नो अत्थनाणहेऊ, अत्थकहं इत्थ सुपसत्था ॥ १ ॥" एवमस्याऽर्थकथितिरभिधीयते । इति गाथार्थः ॥ २ ॥

तत्पाठस्य कथितो कार्यविदन्यथाऽऽगमे कदाचित् नाऽभिनिवेशो विधेय, इति तदनन्तरमनभिनिवेशानं तत्पूर्वकेन च कारणकथितापि कर्तव्येति कारणकर्म च कार्यद्वारेणैवाह—

अणभिनिवेसी एसो, पन्नविओ मुयइ कुग्गहं झत्ति । आसेवेइ अभिक्खं, सुत्तुत्तं तेण करणरुई ॥३॥

व्याख्या—' अनभिनिवेशी ' अतत्त्वाऽनाग्रही ' एषो ' अयं श्राद्धो भवतीति गम्यते । ' प्रज्ञापितः ' परेण तत्त्वं बोधितः सन् ' मुञ्चति ' त्यजति ' कदाग्रहं ' कुत्सितावबोधकरणाभिनिवेशं ' झटिति ' शीघ्रं प्रज्ञापनानन्तरमेवेति शेषः । अभिनिवेशस्य हि विपर्ययरूपतया तद्वतो ज्ञानं क्रिया वाऽकिञ्चित्करे एवेत्यवगम्य सर्वथा तं परिहरन् अनभिनिवेशी प्रज्ञापनीयश्चासौ उच्यते, फलभाग् भवतीति । तदुक्तम्—" न हवइ सम्म सुहफला,—भाई भव्वो विवज्जयब्भावा । तम्हा तप्पडिसेहो, गुणगणबीयं अमोहं ति ॥ १ ॥ अणभिनिवेसो जीवो, पन्नवणिज्जो त्ति सुविहियजणस्स । होइ उवएसणिज्जो, तत्तो सो सीलवं होई ॥ २ ॥ " अर्थरुचौ करणरुचौ वा नाऽभिनिवेशित्वमुपपद्यते, इति तन्मध्ये तस्योपादानमिति । तथा ' आसेवते ' अनुतिष्ठति ' अभीक्ष्णं ' निरन्तरं ' सूत्रोक्तम् ' आगमप्रतिपादितं जिनपूजन-वन्दनकादिकमनुष्ठानं यत इति शेषः, तेन आसेवनेन हेतुना करणरुचिरसौ भवतीति गम्यते । स हि सत्यपि सूत्रार्थरुचिमत्त्वे—" क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । न हि स्त्री-भक्ष्य-भोगज्ञो, विज्ञानात् फलमश्नुते ॥ १ ॥ " इति परिभावयन् विशेषतः करणे श्रद्धालुः स्यात् । तथैव च चारित्रयोग्यतया निर्वाणपथिकः स्यात् । तदुक्तम्—" सुपसत्थवित्थरपरमत्थविऊ वि करणरुइ विरहे रहिऊ हियकरणेणं हियं न पावेइ पाणी जं, तो करणरुई रुइरं कारणमव्वाहयं हियत्थाणं पाणीणं निव्वाण-पुरस्सयपहं " । इति गाथार्थः ॥ ३ ॥

कारणमिति चेऽपि कथंचिदुत्साहोच्छेदे सति न फलभाक्तेति तदनन्तरमनिष्ठितोत्साहं कार्यद्वारेणाऽभिदधानो गुणवत्त्वमुपसंहरन् ऋजुव्यवहारद्वारमुपक्रममाण आह—

कायव्वेसु सुहेसुं, अणिट्ठिओ होइ तस्स उच्छाहो। एवं से गुणवत्तं, रिउववहरणं पुणो सस्स ॥४॥

व्याख्या—योऽनिष्ठितोत्साहगुणवानिति प्रक्रमः, तस्योत्साहो भवतीति संबन्धः। केषु ? इत्याह—' कर्तव्येषु ' विधेयेषु, ' शुभेषु ' सिद्धान्ते विधेयतया प्रतिपादितत्वेन प्रशस्तेषु वन्दन–पूजना–ऽऽवश्यकादिषु, अनेन पैशुन्य–परीवाद–चौर्याद्यप्रशस्तकार्यव्यवच्छेदः। ' अनिष्ठितो ' अनवच्छिन्नो ' भवति ' जायते, ' तस्य ' एतद्गुणवतः श्राद्धस्योत्साहः कार्यकरणाभिलाषातिशयः, दुर्गतशेखरस्य अनर्घरत्नाकरावाप्तौ रत्नग्रहणोत्साहवत्। एवमेव धर्मक्रियास्वपि प्रवृत्तिः फलवती स्यात्। उक्तं च—" धम्मकिरियारुई वि, न ताओ साहेइ निट्ठिउच्छाहो। अच्छिन्नुच्छाहा पुण, सुव्वंती-ऽभिहाणेरिपत्ता ॥ १ ॥" लोकेऽपि अच्छिन्नोत्साहता कार्यसाधिकेति श्रुतिः। तथा च प ख्यानके अण्डकप्लावनेन समुद्राभिभूतस्य टट्टकस्योक्तिः—" अनिर्वेदः श्रियो मूलं, चञ्चूर्लोहमयी मम। अहो–रात्राणि दीर्घाणि, स : किं न ष्यति ? ॥ १ ॥" इति। तदेवमनिष्ठितोत्साहता पञ्चमं गुणवत्त्वम्।

प पि चैते सूत्ररुच्यादयः सातिशयाः सन्तः क्रमेण सम्यग्दर्शनगुणोत्कर्षाधायिन इत्येतेऽपि गुणवत्त्वमुक्ताः। उपसंहरति—' एतद् ' पूर्वोक्तं सूत्ररुच्यादिमत्त्वं ' से ' तस्य श्रावकस्य गुणवत्त्वम्, एतदभावे हि शेषगुणसद्भावेऽपि निर्गुण-

त्वमेव तत्त्वत इति भावः । अथ ऋजुव्यवहरणं चतुर्थं स्थानं प्रस्तौति—'ऋजुव्यवहरणं' पूर्वोक्तशब्दार्थं, 'पुनः' शब्दो गुणवत्त्वाद् विशेषावद्योतने, तेन गुणवत्त्वं तावत् पूर्वोपदर्शितरूपम्, ऋजुव्यवहरणं पुनरेतस्य श्रावकस्य चतुर्थं स्थानं भवतीति गम्यते । इति गाथार्थः ॥ ५ ॥

अपि चलति सचूलो रत्नसानुः कृशानु,–स्तृणमपि च न वाऽत्ति व्यात्तवक्त्रोऽपि चाऽहिः ।
न दशति शिशुमेकं जातुचिज्जायते नो, पुनरिति गुणवत्त्वं वर्जयित्वा विमुक्तिः ॥ १ ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकवृत्तौ गुणवत्त्वं तृतीयस्थानक-विवरणं समाप्तम् ॥

अथ ऋजुव्यवहरणनामकं चतुर्थं स्थानकम् ।

उक्तं शीलवत्त्वस्य प्रधानकार्यभूतं गुणवत्त्वं तृतीयस्थानकम् । अथ गुणवत्त्वस्यैव सामान्यकार्यरूपम् ऋजुव्यवहरणं चतुर्थं स्थानकं चतुर्भेदमाह—

वायाए किरियाए, अविसंवाओ उवायफलविसए । एयं चउव्विहं पि हु, समासओ कित्तइस्सामि ॥१॥

व्याख्या—'वाचो' वचनस्याऽविसंवादः पूर्वोक्तवा ऽनवभाषणम्, एवं क्रियाया व्यापारस्याप्यविसंवादो वचनानुसारेण क म्। अविसंवादपदं मध्यस्थितं डमरुकमणिन्यायेन पूर्वयोर्द्वयोरग्रेतनयोरपि द्वयोर्योज्यं, तेनोपायफलविषये चोपायगोचरः फलगोचरश्चाऽविसंवाद इति तत्र यस्य धर्मादेः पुरुषार्थस्य यत्साधनं दानादि तस्य तत्रैव व्यापारणम् उपायाविसंवादः। तथा फलं वचन-क्रियादिसाध्यभावरूपं, तस्याविसंवादो नान्यथाभावः-फलाविसंवादः; भावानुसारेण वर्तनमित्यर्थः। एवमेतद् ऋजुव्यवहरणम्- कुटिलव्यापारणमपि न केवलं गुणवत्त्वमित्यपेरर्थः। 'चतुर्विधं' चतुःकारं, ' ः' पादपूरणे, ' सतः' संक्षेपेण 'कीर्तयिष्यामि' भ ष्यामि। इति गाथार्थः ॥ १ ॥

तत्र प्रथमं तावत् सकलजनस्फुटलक्षणत्वाद् वचनाविसंवादो तव्यः। ऽप्यनेकविधः, ततः प्राधान्याद्धर्मविषयं वदादौ तमाह—

ाअवि ओ, धम्मे विणिच्छियं संदिद्धं। परिप्फुड जहगहियं, वियागरिंतर नायव्वो ॥

व्याख्या—'वचनाविसंवादः' प्रतीतः, 'धर्मे' सर्वज्ञोपदिष्टश्रुतधर्मविषये ज्ञातव्य इति योगः। कथम्? इत्याह—'सुविनिश्चितम्' अतिशयेन विविधैः प्रकारैर्निर्णीतम्, त एव 'असंदिग्धं' निःसंशयं; निश्चितत्वेनैवाऽसंदिग्धत्वे लब्धे तद्ग्रहणं संशयस्य मिथ्यात्वरूपमहानर्थफलत्वख्यापनार्थम्। 'परिस्फुटं' वर्णतोऽर्थतश्च प्रव्यक्तम्। 'यथागृहीतं' येन प्रकारेण गुर्वादिमुखादवधारितं जीवादितत्त्वं यत्तत्तथैवेति गम्यते। 'व्याकुर्वाणस्य' प्रतिपादयतो 'ज्ञातव्यो' बोद्धव्यः, अन्यथा गुर्वादिवचनेन वि ादः। इति गाथार्थः ॥ २ ॥

अथ व्यवहारविषयं तमाह—

ववहारे वि तह च्चिय, जह गहियं तं तहा भणंतस्स। जह वा लब्भइ लोए, तहा भणंतस्स नायव्वो ॥

व्याख्या—'व्यवहारः' क्रय-विक्रयादिरूपः, सभादिषु उक्ति-प्रत्युक्तिरूपो वा। तथा च वक्तारो भवन्ति "अत्रार्थे युष्माभिः सहाऽस्माकं राजकुले व्यवहार" इति। ततो व्यवहारेऽपि, न केवलं धर्मे, इत्यपिशब्दार्थः। धर्मवदत्रापि वचनाविसंवादो ज्ञातव्य इति योगः। कथम्? इत्याह—'यथा गृहीतं' येन प्रकारेण वाणिजकादेः सकाशात् क्रीतं यद्वस्त्विति गम्यते, तत्तथैव 'भणतो' अभिदधत इति। 'यथा वा' इति वाशब्दः पक्षान्तरसंसूचनार्थः, तेन यथा वा येन प्रकारेण नियतमूल्यादिना 'लभ्यते' प्राप्यते मञ्जिष्ठादिद्रव्यं 'लोके' वणिग्वर्गे तथा भणत इति। उपलक्षणं चैतद्, राजसभादिष्वपि नित्यमात्मानं व्यवस्थापयितुमारभ्य, सुवर्णलक्षं वा लभ्यमुक्त्वा, [ग्रन्थाग्रं ८९०] चौर्यं मया न कृतमिति प्रतिज्ञाय तथैव निर्वाहयत इति। अन्यथा तु विपर्ययः, पुरुषान्तरवचनेन व्यभिचारादिति गाथार्थः ॥ ३ ॥

एवं सर्वश्राद्धसाधारणं वचनाविसंवादमभिधाय, अथ वैद्यादेः श्रावकस्य विशेषविषयमपि तमाह—

विज्जस्स वि वाहिनियाण,-किरियट्ठिइमवितहं भणंतस्स। रण्णो वि हु अवराहं, जहाफुडं वागरिंतस्स॥

व्याख्या—'वैद्यस्यापि' भिषजोऽपि 'व्याधिनिदानक्रियास्थितिं' रोगस्योत्थानबीजं प्रतीकारमर्यादां च 'अवि-

तथा ' सत्यां ' भणतः ' व्याधितप्रभृतीनां पुरतः प्रतिपादयतः, अन्यथा तु वैद्यान्तरवचनेन विसंवाद इति भावः, तथा ' राज्ञोऽपि ' नृपस्यापि भृत्यादिसंबन्धिनमपराधम्-दूषणं ' यथास्फुटं ' येन प्र रेण व्यक्ततया चौरादेः सकाशात्प्रतीतं तथैव ' व कुर्वाणस्य ' अभिदधत इति । अत्र च भणत इत्यनुवृत्तावपि व्याकुर्वाणस्येत्यभिधानं न दुष्टम्, भिन्नवाक्य- र द्, एवं पूर्वगाथायामपि, लोभ-द्वेषादिना त्वन्यथा प्रकाशने चरादिवचनविसंवाद इति । वचनविसंवादा दयोश्च दोष-गुणा लोकप्रकटा एव । तथा चोक्तम्—" अनृतवचनवादी चेत्प्रतीतः पुरा, तौ तदनु यदि सत्यं दैवयोगाद् ीति तदनृत ति लोके प्रत्ययः, लाघवं स्याद्, भवति पुनरवज्ञा, तद्वतो जीवितं किम् ? । तथा-संपद्येरन्नचलवचसां कीर्ति-धर्मा-ऽर्थ-कामाः, कामं लोका विहितमहितात्मीयभावाः ः । त्यक्त्वा शङ्कां धनमिव निजं गुह्यमावेदयन्ति, सर्वे यद्वा गुरु ण ः सत्यभाजो भवन्ति ॥ १ । इति गाथार्थः ॥ ४ ॥

वचनावि ादफलत्वात् ि याऽवि वादस्य, इति तदनन्तरं तमेव धर्मविषयं तावदाह—

किरि । विसंवाओ, धम्मे जह प वेइ इ । गिहि ो किरि रं, जईसु संदंसणाहिंतो ॥५॥

व्याख्या—' क्रियाऽविसंवादः ' प्रा क्तशब्दार्थः, स च ' धर्मे ' धर्मविषये, कथम् ? इत्याह—' यथा ति ' द्वि-त्रादि द्वमध्ये प्ररूपयति श्रावकः सु रूपदेशानुसारेण ' तथैव ' प्ररूपणानुसारे ोति ' विधत्ते । ' गृहिणः ' श्रावकस्य ' क्रियां ' माचारीं-देवपूजादिद्रव्यस्तवरूपाम्, ' इतराम् ' न्यां ' सं ाहिंतो ' —सद्दर्शनात् सम्य-

क्त्वात्सकाशात्, ‘ यतिषु ’ इति यतीनां संबन्धिन्या इत्यर्थः । सम्यक्त्वं हि यतीनां श्रावकाणां च यावज्जीवं त्रिविधं त्रिविधेन मिथ्यात्वपरिहारेणैव शुद्धं भवति, शेषा च क्रिया भावस्तवरूपा साधूनां, श्राद्धानां तु द्रव्यस्तवरूपा । ततश्चासौ श्रावको यतीनां सम्यक्त्वमेकं विहाय शेषां यतिक्रियाया अन्यां प्ररूपयति करोति चेति करणाविसंवादः, अन्यथा तु प्ररूपण–क्रिययोर्विसंवाद इति गाथार्थः ॥ ५ ॥

अथ तमेव व्यवहारविषयं दर्शयन्नुपायाविसंवादमपि शेषपुरुषार्थसाधकतमत्वेन प्राधान्याद्धर्मस्य तद्विषयं तावत् प्रस्तौति—

ववहारे पुण ऊणं, न देइ पडिरूवगं नवा कुणइ । जाणइ उवायमूलं, धम्मस्स य तं तहायरइ ॥ ६ ॥

व्याख्या—धर्मे तावदुक्तः करणाविसंवादो, ‘ व्यवहारे ’ क्रय–विक्रयादिरूपे ‘ पुनरूनं ’ प्रस्तुतमूल्यलभ्यादतिहीनं वस्तु ‘ न ददाति ’ नैव ग्राहकस्य प्रयच्छतीति । ‘ प्रतिरूपः ’ सदृशो व्रीह्यादेरिव पलिञ्जादिः, स एव प्रतिरूपकः, तेन व्यवहारोऽप्युपचारात् प्रतिरूपकः, तं ‘ न करोति ’ न विधत्ते यदि तदा क्रियाऽविसंवाद इत्यर्थः । तथा ‘ जानाति ’ बुध्यते ‘ उपायाः ’ साधनानि तेषामपि ‘ मूलम् ’ आद्यं—वक्ष्यमाणदानादिकं ‘ धर्मस्य ’ पुण्यस्य, चशब्दः पूर्वाऽविसंवादसमुच्चयार्थः । ज्ञात्वा च तदुपायमूलं ‘ तथैव ’ ज्ञातानुसारेण ‘ आचरति ’ व्यापारयति; धर्मादावुपेये दानादिकमेवोपायं व्यापारयन्नुपायाऽविसंवादीति गाथार्थः ॥ ६ ॥

धर्मोपायानेवाह—

दाणं सीलं च तवो, ाव माईहिं ि ज्झए धम्मो । दाणाणमभयदाणं, जिणदा ं साहुदा ं च ॥ ॥

व्याख्या—'दानं' वितरणं, 'शीलं' मनःसमाधानं, 'तपो' अनशनादिकं, 'चः' समुच्चयार्थोऽत्र योज्यः, एते ोपायाः। तथा ' वना ' अनुमोदनादिप्रधानवि ार शिक्षामरूपा तत्त्वपरिच्छेदाभ्यासरूपा वा, आदि- र्येषां त्यागादीनां तैः, किमित्याह—'सिध्यति' निष्पद्यते 'धर्मः' श्रेयः। इह च भावनाया दानादिभ्यो भेदेन शेष- गुणसंग्राहकाऽऽदिपदसंबद्धत्वेन चोपादानं सर्वेषामप्येषां भावनास थानामेव विशिष्टफलसाधकत्वख्यापनार्थम्। दानं चाऽ- नेकधा, इति विशिष्टविषयं तदाह—'दानानां वितरणानां मध्ये िशिष्टमिति शेषः, 'अभयदानं' सत्त्वाऽव्यापादनसं- कल्पः, जिनदानं सा दानं च तदुद्देशेन वित्तव्यय इति गाथार्थः ॥ ७ ॥

जीवितादिभयभीतानां भयापहरणपटिष्ठरक्षणलक्षणतया सुप्रसिद्धत्वादभयदानस्य तदुपेक्ष्य जिनदानमेवाह—

कुसुमाभर विलेव ,–सुगंधिधूयाइ होइ ि दाणं। ा ं चेईं,–हरा तह वरबिंबाणं॥ ॥

व्याख्या—' सुमानि ' जात्यादिपुष्पाणि, 'आभरणानि ' ध्यलंकरणानि, 'विलेपनं' चन्दनादिसमल- म्भनं, 'सुगन्धिधूपः' रभिकर्पूरागुरुप्रभृतिद्रव्यसंघातः; ततः ानि चेत्यादिद्वन्द्वः। आदिशब्दाद् स–वस्त्र–

स्नात्रादिग्रहः । एतद्भवति ‘ जिनदानं ’ तीर्थकरविषयं वितरणं धर्मोपाय इति योगः । एवं वक्ष्यमाणदानेष्वपि । तथा ‘ कारणं ’ विधापनं ‘ चैत्यगृहाणां ’ जिनमन्दिराणां, ‘ चः ’ अनुक्तसमुच्चये, तेन प्रतिष्ठा–यात्रादिविधापनपरिग्रहः । तथेति समुच्चये, ‘ प्रवरबिम्बानां ’ मनोहरजिनप्रतिमानामिति । प्रवरपदं बिम्बपदसमस्तमपि पुष्पादिविशेषणतयाऽपि योज्यं, योग्यत्वात्, तादृशामेव पुष्पादीनां भावोल्लासनिमित्तत्वात् । इति गाथार्थः ॥ ८ ॥

एवं परमोत्तमपात्रविषयं दानमभिधाय, अथ गुणतारतम्येनोत्तममध्यमहीनपात्राणां साध्वादीनां क्रमेणाऽभिधित्सुः साधुदानविशेषमाह—

साहूण वसहिदाणं, ओसह–भेसज्ज–वत्थ–पत्ताणं । आहारस्स जहाविहि, दाणं साहूणमुचियस्स ॥९॥

व्याख्या—‘ साधुभ्यो ’ भावयतिभ्यो ‘ वसतिदानम् उपाश्रयवितरणम्, आदावेव पार्थक्येन चोपादानं शेषदानानामप्येतद्दानहेतुकतया विशिष्टतरोपष्टम्भनिमित्तत्वाद् अस्य प्राधान्यख्यापनार्थम् । श्रूयते हि—“ जो देइ उवस्सयं मुणिवराण, तव–नियम–बंभ–जुत्ताणं । तेणं दिन्ना वत्थ–ऽन्न,—पाण–सयणा–सण वियप्पा ॥ १ ॥ ” ‘ औषधं ’ नागरादि, ‘ भैषज्यं ’ नागर–मरिचादिमेलकः, ‘ वस्त्र–पात्रे ’ प्रतीते, ततो द्वन्द्वः, तेषाम् । तथा ‘ आहारस्य ’ अशनादेः । सर्वेषां चैषां दानं ‘ यथाविधि ’ संभ्रमातिशय–सुपात्र–शुद्धदेयाद्यन्वेषणरूपसूत्रोपदेशानतिक्रमेण । तथा चोच्यते–“ अभिमुहगमणं आसण,–वंदणमह संविभागदाणं च । पुणरवि वंदण अणुवयण, सक्कारो छव्विहो एस ॥ १ ॥ ” तथा पात-

मुत्तमगुणैरलं , दायकोऽपि पुलकं दधत्तनौ, देयवस्तु परि द्धं, पुष्कलत ामिदं फलमिति । सर्वानुष्ठानेषु विधेरभिमता-पादकत्वेऽपि यत् साधुदानेऽभिधानं विशे स्तद् यथाकथंचित्तेभ्यो दत्तं महाफलमेवेत्यधुनातनसातशीलदेशनानिराकर-णार्थमिति मन्तव्यम् । साधूनामुचितस्यैव यतिजनयोग्यस्य वस्त्राहारादेः, न सुवर्णादेः, तस्यापि प्रासुकैषणीयस्येत्यर्थः । थवा साधूनां शोभनानाम्, इत्यौषधादीनामेव विशेषणम् । इति गाथार्थः ॥ ९ ॥

अथ साधर्मि नुकम्पादाने प्राह—

साहम्मिय दाणं, अही धम्म ह विसेसे । दीणाईणणुकंपा,–दाणं धम्मस्सुवाउत्ति ॥१०॥

व्याख्या—' साधर्मिकेभ्यः ' समानदेव–गुरुप्रतिपत्तिमद्भ्यः श्रावकेभ्यो ' दानं ' बन्धुबुद्ध्या वस्त्रा–ऽऽहारादिवितरणम् । तथा चोक्तम्—" दीनानाथसधर्मचारिणि जने ानदानादिभिः, यः स ातिकुलेप्सितेऽपि विधिना सद्बन्धुबुद्ध्या भृशम् । वात्सल्यं विदधाति कारयति वा धर्मप्रशंसास्पदं, स श्राद्धः कथितो विवेकमहतामेकः सतामग्रणीः ॥१॥ " ' अहीनधर्मेभ्यश्च ' संपूर्ण–विशुद्धा ाद्यनुष्ठानेभ्यः । तथेति समुच्चयार्थो योजित एव । ' विशेषेण ' अतिशयेन विशिष्टतरमित्यर्थः । एतस्यैव च सम्यक्त्वाचारेषु वात्सल्यरूपतया महाफलता गीयते । तदुक्तम्—" साहम्मियथिरकरणं, वच्छ सासणस्स सारोत्ति । मग्ग ायत्तणओ, तहा अणासो य धम्माओ ॥ १ ॥ " तथा ' दीनादीनां ' निःस्व–निर्नाथ–रोगार्त्तप्रभृतीनाम् ' अनुकम्पादानं ' करुणामात्रेण तदुचितवस्तुवितरणम् । उपलक्षणं चैतत्, तेन गृहागतस्य

सर्वस्य भिक्षाचरादेरुचितदानं ज्ञानदानं च, किम्? इत्याह—'धर्मस्योपायः' पुण्यस्य साधकतमम्। 'इति' शब्दो दानलक्षणधर्मोपायपरिसमाप्तौ। इति गाथार्थः॥ १०॥

अथ शीलादित्रयमाह—

सीलं चित्तसमाहाण–मो उ सामाइयाइकरणेण। होइ चउत्थाइ तवो, भावण नेया दुवालसहा॥११॥

व्याख्या—'शीलं' तु सदाचारः। पुनः किम्? इत्याह—'चित्तसमाधानं' विशुद्धान्तःकरणैकाग्र्यम्। 'ओ' इति निपातः पादपूरणे, 'तुः' पुनरर्थो योजित एव। 'सामायिकादिकरणेनेति' समस्य–रागादिरहितस्य सत आयो–ज्ञानादीनां लाभः समायः, स एव विनयादेराकृतिगणत्वाद् इकण्प्रत्यये सामायिकं–सर्वसावद्ययोगविरतिपरिणामः, तत्पूर्वकमनुष्ठानं च। आदिशब्दाद्देशविरतिपरिणामादिग्रहः, तस्य करणं–विधानं प्रतिपत्तिरिति यावत्, तेन करणभूतेन 'भवति' वर्तते ज्ञेयमित्येवंरूपतयाऽत्र वक्ष्यमाणक्रियायोगः। तथा 'चतुर्थं' भोजनचतुष्टयत्यागलक्षणम् एकोपवासरूपमागमप्रसिद्धम्, आदिशब्दात् षष्ठाऽष्टमादिपरिग्रहः। तत्किम्? इत्याह—'तप' इति निराशंसविशुद्धाध्यवसायेन बाह्याभ्यन्तरतनुतापकानुष्ठानविशेषः। तथा 'भावना' पूर्वोक्तस्वरूपानुप्रेक्षा 'ज्ञेया' ज्ञातव्या श्रावकेण 'द्वादशधेति' द्वादशप्रकारा। तदुक्तम्—भावयितव्यमनित्यत्व[1]मशरणत्वं[2] तथैकता[3] अन्यत्व[4]मशुचित्वं[5] संसारः[6] कर्माश्रवः[7] संवरविधिश्च[8] निर्जरा[9] लोकविस्तरः[10] धर्मस्वाख्याततत्त्वचिन्ता[11]श्च बोधेः सुदुर्लभत्वं[12] च भावना द्वादश विशुद्धाः। एवं दानादिकं

धर्मोपायत्वेन सम्यगवगम्य तथैव व्यापारयत उपायाविसंवादः । इति गाथार्थः ॥ ११ ॥

अथ धर्मानुषङ्गिकफलत्वादर्थस्य तदुपायं नैश्चयिकमाह—

अत्थोवाओ पुन्नं, पुण च्चेण ववहरंतस्स । अहवा अइलोभेणं, उद्धारगमाइ नो देइ ॥ १२ ॥

व्याख्या—'अर्थोपायो' द्रव्योपार्जननिदानं 'पुण्यं' सुकृतं, तत्पुनः सुकृतं 'सत्येन' वचन-क्रियाद्यविसंवादलक्षणेन 'व्यवहरतः' क्रय-विक्रयादि कुर्वतः श्राद्धस्य भवति, लोक-लोकोत्तराऽनिन्दितव्यवहारस्य चौर्यादिपरिहारस्यैव सु_ साधनत्वाविसंवादात्; अनेन पुण्य-व्यवसाययोः संहतयोः फलसाधकत्वमिति लक्षयति । अथ व्यावहारिकमपि तदुपायगणमभिधित्सुर्व्यवहारस्यैव विधेयाविधेयविभागमाह —'अथवा' इति प्रकारान्तरद्योतकमव्ययम्, ततो 'अतिलोभेन' सातिशयधनगार्द्ध्येन, 'उद्धारकादि नेति' उद्धारकं सुवर्णादिग्रहणकमन्तरेण प्रतिभूमात्रग्रहणावष्टम्भपूर्वकं स्वद्रविणवितरणम् । मकारोऽलाक्षणिक इति । आदिशब्दात् साक्षिमात्रग्रहणपूर्वकदानग्रहः, तेन, अत्र तृतीयालोपः प्राकृतत्वात्; 'न ददाति' न वितरति स्वद्रव्यं श्रावकः, तथा दाने हि कदाचिद् बहुलाभसंभवेऽपि भूयसो लोकस्य कुशीलत्वेन प्रायो नीव्या अपि क्षतिसंभवादस्याऽविधेयत्वम् । एवमन्यत्रापि यथासंभवं द्रष्टव्यम् । इति गाथार्थः ॥ १२ ॥

तथा—

भंडंपि अइमहग्घं, संगहे णइ निययमुल्लाउ । आसकरिगोणमाई, न नियट्ठा धारए मइमं ॥१३॥

व्याख्या—न केवलं उद्धारादिना न ददाति, 'भाण्डमपि' कुङ्कुमादिक्रयाणकमपि 'निजकमूल्यात्' प्रायकस्वकीयमूल्याद् 'अतिमहार्घं' द्विगुण-त्रिगुणादिभावेन अत्यन्तबहुमूल्यं 'न' नैव 'संग्रहे' प्रभूततरं गृहीत्वा भाण्डशालादिस्थापनिकायां 'करोति' विधत्ते मतिमानिति योगः, तादृशस्य प्रायः क्षतिहेतुत्वात्। तथा 'अश्व-करि-गवादीन्' तुरग-हस्ति-वृषभ-करभादींश्चतुष्पदभेदान् नैव 'निजार्थे' स्वार्थं तल्लाभेच्छुः 'धारयति' संगृह्णाति 'मतिमान्' सबुद्धिः श्राद्ध इति प्रक्रमः। प्रभूतकालमश्वादिधारणं हि खादन-मरणादिभिरवश्यं क्षतिहेतुः, गृहीतमात्रविक्रयोऽपि केशवाणिज्यकर्मादानरूपतया निषिद्धः, इति तद्वाणिज्यं न कार्यम्। इति गाथार्थः ॥ १३ ॥

तथा—

कप्पाससुत्तवत्थाइ,-संगहं कुणइ धन्नमाईणं। अइपडियविच्चयाण वि, न ते उ संगहणमिच्छन्ति ॥१४॥

व्याख्या— देशविशेषरूढ्या 'कप्पासो' रूतमुच्यते, तेन 'कर्पाससूत्रवस्त्रादीनां' रूत-तन्तु-वसन-प्रवाल-मौक्तिकमञ्जिष्ठा-पूगादीनां 'संग्रहं' भाण्डशालादौ बहुकालमपि धारणं 'करोति' विधत्ते; एषामजुगुप्सितत्वेन तथाविधजीवसंसक्तिविकलत्वेन च लोकलोकोत्तराऽनिषिद्धत्वेन कथंचिदल्पलाभत्वेऽपि संग्रहस्य समीचीनत्वात्। रूतादिविपरीतस्य तु अत्यन्तं निषेधमाह—'धान्यं' तिल-गोधूमादिकम्, आदिशब्दाद् लाक्षा-गुड-स्नेह-कुसुम्भ-नीली-सक्तुकादिग्रहः। तेषां पुनः अतिपतितवेक्षकानामपि प्रायिकतन्मूल्यापेक्षयाऽत्यन्तसमर्घाणामपि, आस्तां महार्घाणामित्यपिश-

ब्दार्थः, ' न ' नैव ते श्राद्धाः, ' तुः ' पुनरर्थो योजित एव, ' संग्रहणं ' भाण्डशालादिषु बहुकालस्थापनम् ' इच्छन्ति ' अभिलषन्ति कर्तुमिति शेषः । न चात्र ' धन्नाइणं तु संगहणं ' इति भाष्येण विरोधः शङ्कनीयः, तत्र हि खादन-मरणाद्यनेकाऽपायाकुलत्वेन द्रव्यार्जनानुपायत्वमश्वादिसंग्रहस्य प्रत्यपादि; धान्यादिसंग्रहस्य तु प्रायस्तथाविधाऽपायाभावाद् द्रव्यार्जनोपायत्वमात्रं, न तु तत्संग्रहस्य विधेयत्वम् । एतदेव च ' इच्चाइ अत्थुवाउ ' इत्याद्यभिदधता तत्रैव स्पष्टीकृतम्, तथाविधाऽन्नादिव्यवहाराणां हि प्रचुरतरत्रसादिजीवात्यन्तसंसक्तिमत्तया भगवत्यादिषु लाक्षावाणिज्यत्वेन प्रतिपादनात् । विधेयाविधेयत्वाचिन्ता तु द्रव्योपायानां सूत्रे, तत्र च व्यक्तो निषेधस्तत्संग्रहस्य । न च व्याख्येयसूत्रनिषिद्धं भगवत्यादिनि ं च भगवतीवृत्तिकार एव भगवान् भाष्यकारस्तमनुज्ञास्यतीति संभवति, तस्माद् यथाव्याख्यानमेव सूत्रार्थः समीचीन इति व्यवस्थितम् । इति गाथार्थः ॥ १४ ॥

तथा—

अंगोवरि उद्धारं, निच्छइ अइलाभयं मुणेऊणं । थेवे वि लाभेणं, वंधेणं अहव रुक्केणं ॥ १५ ॥

व्याख्या—' अङ्गं ' ग्राहकस्य शरीरं, तदुपरीति–तदेव लग्नकं विधाय विश्वासातिशयाद् यद्दीयते तद् अङ्गोपरीत्युच्यते । तादृशमुद्धारकमुक्तस्वरूपम् ' अतिलाभदं ' प्रचुरतरद्रव्यायनिदानं ' ज्ञात्वा ' मनसा विभाव्यापि ' नेच्छति ' नाभिलषति दातुमिति शेषः । ं त ददाति ? इत्याह—' स्तोकेनापि ' अल्पीयसाऽपि लाभेन द्रव्य प्त्या संभावितेन

बन्धेन सुवर्णादिग्रहणकग्रहणेन । 'अथवा' इति पक्षान्तरसंसूचनार्थः, 'रुक्केणं ति' साक्षात्सुवर्णादिग्रहणेनैव, नान्यथा प्रकारान्तरेण, उद्धारकादिना दीयमानस्याऽवश्यं मूलक्षतिहेतुत्वेन अस्यैव प्रकारद्वयस्य साधीयस्त्वादिति भावः । इत्यर्थोपाय इति । एवं कामोपायोऽपि स्त्रीषु साम-दान-माधुर्यादिप्रवृत्तिः । धर्मोपाय एव तु निःशेषोऽपि पारम्पर्येण मोक्षोपाय एव ज्ञेय इति । न चाऽनयोरर्थ-कामोपाययोर्वक्ष्यमाणार्थ-कामकौशलाभ्यामभेदः, अर्थकौशलं हि भाण्डस्यैव प्राधान्याप्राधान्यपरिज्ञाननैपुणं तत्पूर्वकश्च संग्रह इति । तथाविधस्यैव भाण्डादेर्ग्रहणाऽग्रहणविधिः सत्यत्वेनैव च व्यवहर्तव्यमिति तु अर्थोपाय इति । तथा कामकौशलं स्त्रीमात्रस्येङ्गिताकारादिना शुभाशुभभावनिश्चयादिकं, तन्निश्चये तत्संदेहे वा स्वरचाम्यमक्रियास्वस्खलितप्रवृत्तिरप्युपचारात्तत्कौशलम् । स्वदारा हि विराधिताः कदाचिद् वधाद्यनर्थकरणेऽपि प्रवर्तेरन्निति स्वदाराणामेव सर्वप्रयत्नेन चित्ताराधनप्रवृत्तिरेव तु कामोपाय इति । एवं सकलपुरुषार्थोपायानवगम्य तथैव प्रवर्तमानस्योपायाविसंवादः । इति गाथार्थः ॥ १५ ॥

अथ भावाविसंवादमाह—

पिइ-माइ-भइणि-भाउ य, भावं संवयइ जेण तं कुज्जा । अहवा वि परूविंतो, जहट्ठियं पन्नविज्जा उ ॥

व्याख्या—'पितृ-मातृ-भगिनी-भ्रातृणां' प्रतीतानां, 'भावः' प्रियाप्रियादिषु शुभाशुभादिषु परिणामः, स संवदति, तद्विरुद्धभावान्तरानुत्पादेन संघटते येन केनापि कृतेन सता प्रियादिविषयदानादानादिना तद्दानादिकं 'कुर्याद्'

विदध्यात्, भावमिति द्वितीया प्रथमार्थे प्राकृतत्वात् । साधर्मिकाणां हि पित्रादीनां सर्वत्र प्रिये पुत्रादौ साधर्मिकादौ च सर्वप्रयत्नेन दानादिकं, तत्प्रत्यनीकेषु च मानभ्रंशादिकम्, असाधर्मिकाणां तु स्वकीयधर्मानुगतभावाऽबाधया प्रधानवस्त्रादिदानेन तच्चित्तावर्जनमात्रार्थं, तत्प्रियपुत्रादौ तथैव दानादिकं विदधानस्तद्भावाऽविसंवादको भवेदिति भावः । न चाऽस्य वक्ष्यमाणेहलोकगुरुशुश्रूषया अभेदः, सा हि पित्रादीनामेव क्वचिद्दानादौ प्रवर्तमानानां देयसंपादनाद्युपचारेण मनःसमाधानापादनरूपा, अयं तु तत्प्रियपुत्राद्युपचारेणेति भेदः । लौकिकभावाऽविसंवादं प्रतिपाद्य लोकोत्तरमप्याह—'अथवाऽपीति' अथवेति भावाविसंवादप्रकारान्तरसंसूचनार्थः, अपिर्भिन्नक्रमः, ततः 'प्ररूपयन्' किञ्चिज्जीवादितत्त्वं कस्यापि पुर उपदिशन् श्राद्धो 'यथास्थितं' येन प्रकारेण प्रमाणेन प्रतिष्ठितं तथैव 'प्रज्ञापयेत्' प्रतिपादयेत्, अन्यथा तु स्वकीयस्य प्रेक्षावतः श्रोतुर्वा भावस्य विसंवादः स्यात् । इति गाथार्थः ॥ १६ ॥

तमेव प्रकारान्तरेणाह—

अहिणवधम्माणं वा, जेण विसंवयइ धम्मपरिणामो । न तहा कुज्जा किं पुण, जेण थिरो होइ तं कुणइ ॥

व्याख्या—'अभिनवधर्माणां' तत्कालप्रतिपन्नविशुद्धार्हन्मार्गाणां सत्त्वानां चेति पूर्ववत् । येन केनापि कलहाऽसभ्यभाषण–धरणकक्रियाद्यशुद्धव्यवहार–चैत्यवन्दनपूजाप्रतिक्रमणाद्यविधिप्रवृत्तिदर्शनादिना 'विसंवदति' विघटते धर्मपरिणामो विशुद्धमार्गप्रतिपत्त्यध्यवसायः, यत्तदोर्नित्याभिसंबन्धात्, तत्कृत्यं तेनाभिनवधर्मभावोपघातकत्वप्रकारेण

'न कुर्याद्' विदध्यान्नैव । अमुमेवार्थं स्पष्टप्रतिपत्तये व्यतिरेकेणाह—'किं पुनरिति' किन्तु येन पूर्वोदितकलहादिपरिहारलक्षणेन कृत्येन 'स्थिरः' प्रतिपत्तिकालाद् दृढतरो 'भवति' जायते भावस्तत् 'करोति' विधत्ते श्राद्धः । पुनः करणक्रियाभिधानं भिन्नवाक्यत्वाददुष्टमिति । न चाऽस्यापि वक्ष्यमाणधर्मानुगतभावकौशलादभेदः, तद्धि इङ्गितादिना भावज्ञानं मुख्यतः, उपचारतस्तु तत्पूर्वकं स्थिरीकरणादिकम् । अयं तु भावस्थिरीकरणहेतुक्रियाविशेषरूपः । तदत्र क्रियायाः प्राधान्यं, तत्र तु ज्ञानस्य प्राधान्यमिति भेदः । इति गाथार्थः ॥ १७ ॥

समस्तपुरुषार्थदा जिनवरेन्द्रवाणी च या, कषयविरतिर्यथा कलुषसन्ततिच्छेदिनी ।
ऋजुव्यवहृतिः सदा भवति कस्य हंसीव सा, न मानसविहारिणी स्फुरदगण्यपुण्यश्रियः ॥ १ ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकवृत्तौ ऋजुमतिव्यवहरणं नाम चतुर्थस्थानकं विवरणतः समाप्तम् ॥

अथ गुरुशुश्रूषानामकं पञ्चमं स्थानकम् ।

उक्तं सप्रभेदमृजुमतिव्यवहरणम् । अथैतस्यैव प्रधानकारणभूतां गुरुशुश्रूषां सप्रभेदामाह—

रु स्सू तिविहा, सेवासंपाडणे भावे य । इहलोय गुरू पियरो, सुस्सूसणं कुणइ ताणं ॥१॥

व्याख्या—' गुरूणां ' पूर्वोक्तस्वरूपाणां ' शुश्रूषा ' सामान्येन पर्युपासना ' त्रिविधा ' त्रिप्रकारा । सेवासंपादनेनेति ' शिरोनमनाञ्जलिप्रग्रहसमासन्नसदावस्थिति–ससंभ्रमादेशादिविधानं सेवा, वाञ्छिताहारादिसकलवस्तुभिस्तद्देहपरिजनादिकार्यसंपादनमेव च संपादनम्, ताभ्यां ते एव वा श्रूषा, एकवचनं प्राकृतत्वात् समाहाराद्वा । भाव आत्मपरिणामविशेषः, तद्धेतुर्विशिष्टदान–संमानादिरपि भावः, तत्र च तद्विषये च शुश्रूषेति प्रकृतम् । भावस्य च भिन्नविभक्तित्वेन भेदेन चोपन्यासः पूर्वद्वयसंपाद्यत्वात् प्राधान्यख्यापनार्थः । गुरुशुश्रूषेत्युक्तम्, तत्र च ' इहलोके ' एतद्भवे एवाऽचिन्त्यमहिमचिन्तामणिकल्पसद्धर्मप्रभृतिसकलपुरुपार्थसंपत्तिनिमित्तजन्मसंपादकत्वाद् ' गुरू ' गौरवार्हौ ' पितरौ ' माता–पितरौ, ततस्तयोः ' श्रूषणं ' पूर्वोपदर्शितशिरोनमनादिसेवालक्षणमादरतः ' करोति ' विधत्ते । नेन च सामान्यवचनेन आद्यः शुश्रूषाभेदः प्रतिपादितः । इति गाथार्थः ॥ १ ॥

थ द्वितीय–तृतीयावाह—

आहार–वर –सयणा–इए उज्जमइ इच्छियतरेसु । भावे उ ाणमणुकूल–मायरे दाणमाईसु ॥२॥

व्याख्या—' आहार–व –शयनादिकेषु ' भोजना–ऽऽच्छादन–शय्यो–पवेशना–ऽलंकारादिषु, ' ईप्सिततरेषु ' मनोहारितयाऽत्यन्तप्रियेषु ' च्छति ' सर्वादरेणोद्यमं करोति, ोः संपादयत्येतान् इत्यर्थः । अनेन द्वितीयभेद उक्तः ।

तृतीयभेदमाह—' भावे तु ' भावविषया पुनरेवं शुश्रूषा ' तयोः ' पित्रोः, ' अनुकूलं ' मनःप्रसादसंपादकं देवद्रव्य-संपत्ति—च्छन्दानुवर्तनादिकमनुसरति—करोतीति, ' दानादिषु ' ताभ्यामेव विधीयमानबान्धवादिविषयाभीप्सिताहारादि-वितरणादिषु, एतदपि विशेषतः साधर्मिकादिविषयदानादौ बोद्धव्यम् । इति गाथार्थः ॥ २ ॥

अथ लोकोत्तरगुरूंस्तच्छुश्रूषाभेदांश्चाह—

अहवा वि गुरू सम्मत्त—दायगा ताण होइ सुस्सूसा । इंताणभिमुहगमणं, उट्ठाणं उट्ठिएसु च ॥ ३ ॥

व्याख्या—अथवेति पक्षान्तरे, ' गुरवो ' गौरवार्हाः सम्यक्त्वदायका भवकोटाकोटीदुरापतत्त्वार्थविषयतयेति प्रत्य-योत्पादकाः, तेषां ' भवति ' जायते ' शुश्रूषा ' उपास्तिः कर्तव्येति शेषः । तत्रापि सेवां तावदाह—' आगच्छताम् उद्यत-विहारेण देशान्तरादेरागमनं विदधतां गुरूणां क्वचिद् ' अभिमुखगमनं ' संमुखीनं यानम् ' उत्थानं ' ससंभ्रममासनत्य-जनम् ' उत्थितेषु ' ऊर्ध्वस्थितेषु पुनः । इति गाथार्थः ॥ ३ ॥

तथा—

विस्सामणाइ सम्मं,—ठियाणऽणुव्वयणमेव जंताणं । संपाडणमेयाणं, सामिच्छियाणं विसुद्धाणं ॥४॥

व्याख्या—' विश्रामणं ' स्वाध्यायादिश्रान्तानां त्रिविधसंबाधनतया शारीरश्रमापनोदनम्, आदिशब्दात्तथाविधाऽन्य-वैयावृत्त्यभेदग्रहणं, तत् ' सम्यक् ' भावसारं त्वगादिसुखहेतुत्वेन वा ' स्थितानां ' सुखासनासीनानाम् ' अनुव्रजनमेव '

पश्चाद्गमनमेव, न तु विश्रामणादिकं यातां–गच्छतां क्वचिद्विहारक्रमाद्यर्थमिति पूर्वोदितापित्राद्यपेक्षया विशिष्टतरशिरोनमनादिकमादधान एव एतद् गुरुषु सातिशयं विदधातीति भावः । न चाऽस्य र्वभिमुखगमनादेर्जीवोपमर्दननिमित्तत्वेन असमीचीनतेति वाच्यम्, सामान्यसाधूनामपि विषये “ अभिमुहगमणमासणं० ” इत्यादिना सिद्धान्ते तस्याऽभिधानात् । नृपादीनामपि समस्तस्वसैन्यादिसनाथानामेव गुरुषु प्रतिपत्त्यतिशयख्यापनार्थं वन्दनादिनिमित्तं गमनश्रवणाच्च । विश्रामणादिकमपि श्राद्धस्य यदुक्तं तद् गुर्वादिविषयभक्त्यतिशयख्यापनार्थम् । गुर्वादयस्तु कदाचित्पु म्बनेनैव तत् कारयन्तीति । अथ संपादनमाह–‘ संपादनं ’ स्थानान्तरादाहृत्य संघटनम्, ‘ एतेषां ’ गुरूणां सपरिकराणाम् । कस्य संपादनम् ? इत्याह–‘ समीप्सितानाम् ’ अभिवाञ्छितानामाहारादीनां, ‘ विशुद्धानां ’ प्रा कैषणीयानाम् । इति गाथार्थ ॥ ४ ॥

अथ भावशुश्रूषामाह—

भावाणुव तह, व्वप त्ते ाण कायव्वं । म दाय । , दुप्पडियारं जओ भणियं ॥५॥

व्याख्या—‘ भावा वर्तनं ’ तेषां क्वचिद्दानव्याख्यानादौ प्रवर्तमा नामा कूल्येन तदभिप्रायानुवृत्तिच्छन्दोऽनुवर्तनादिकं ‘ तथेति ’ स यार्थो गाथादौ द्रष्टव्यः, ‘ सर्वप्रयत्नेन ’ ारीर–वाचिक–मानस–दान–सम्मानादिस ादरे ‘ तेषां ’ सद्गुरूणां ‘कर्तव्यं’ विधेयं भवतीति गम्यते । मादेवम् ? इत्यत ाह—‘सम्यक्त्वदायकानां’ सदुपदेशदानेनाऽनन्त चयेणाऽमन्दप ानन्दसंपादक यग्भावोत्पादकानां ‘ दुष्प्रतीकारं ’ प्रतिकर्तु ः यं ‘ यतो ’ यस्मात्कार ाद्

‘ भणितम् ’ उक्तमागमे गणधरादिभिः । इति गाथार्थः ॥ ५ ॥

यदुक्तं तदेवाह—

सम्मत्तदायगाणं दु–प्पडियारं भवेसु बहुएसु । सव्वगुणमेलियाहिं वि, उवयारसहस्सकोडीहिं ॥६॥

व्याख्या—‘ सम्यक्त्वदायकानां दुष्प्रतीकारम् ’ इति पूर्ववत् । कुत्र कैर्दुष्प्रतीकारम् ? इत्यत आह–‘ भवेषु मनुजदेवादिजन्मसु ‘ बहुषु ’ संख्यातिक्रान्तत्वेन प्रभूतेषु वर्तमानाभिः ‘ सर्वगुणमेलिताभिः ’ द्विगुण–त्रिगुणाभिः, यावदनन्तगुणाभिरपीत्यर्थः, उपकारसहस्रकोटीभिः भवे विधीयमानदान–संमानादिगुणान्तरकोटीसहस्रैरपि तदुपकारसंवादकोपकारान्तरकरणाऽभावादिति भावः । तदुक्तम्–“ दुष्प्रतीकारौ माता,–पितरौ–स्वामी गुरुश्च लोकेऽस्मिन्’ तत्र गुरुरिहाऽमुत्र च सुदुष्करतरप्रतीकारः । तत्किं सर्वथा तेषां प्रतिकर्तुमशक्यमेव, उत कथञ्चिच्छक्यमपि ? तत्रोच्यते–कथञ्चित्सम्यक्त्वादेः प्रतिपतितानां तत्रैव पुनः स्थापनेन, नान्यथा । तदुक्तम्–“ जो जेण जम्मि ठाणम्मि ठाविओ दंसणे व चरणे वा । सो तं तओ चुयंतं–मि चेव ठविउं भवे निरिणो ॥ १ ॥ ” तदेवं परमोपकारिषु गुरुषु सर्वादरेण शुश्रूषा संगता । इति गाथार्थः ॥ ६ ॥

हेयोपादेयतत्त्वावगतिसुखविधावुच्छ्वसद्दीपकोला, स्थूलाज्ञानान्धकारास्तरणदिनमणिप्रोच्यदुद्दामदीप्तिः ।

वांनवीर्थं ार्थान् रक नादधानैव :, शुश्रूषा सद्गुरूणां किमि न ति ाभा ां ॥ १ ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकवृत्तौ गुरुशुश्रूषास्थानकं पञ्चमं विवरणतः समाप्तम् ॥

अथ प्र चनकौश ा यं ष्ठं स्थानकम् ।

ता गुरुशुश्रूषा; तस्या एव प्रधानं कार्यं प्रवचनकौ माह—

को पु , छ्भेयं मा ओ भणियं । जिणिंदभणिए, ो पढमं तु ॥१॥

व्याख्या—' चनकौशलं ' जिनशासनरहस्यनैपुण्यं; तद सारिश्रद्धान–प्ररूप बहुमान–तदर्थानुष्ठानादिव्यवहारोऽपि उपचारात्कौशलम् । ' पुनः ' इत्यनेन गुरु श्रूषाया एतद्भिनत्ति । ' षड्भेदं ' षट्प्रकारं सूत्रादिविषयभेदात् । तदुक्तम्–" जिणसासणनिउणत्तं, एयं वुच्चइ तहा छब्भेयं च । तत्थे उस्सग्गा,–ऽववायववहारभावे य" ॥ १ ॥ ' तद् ' इत्यागमप्रसिद्धं, ' समासतः ' संक्षेपेण, मूलभेदापेक्षया षड्विधम् वान्तरभेदानां बहुत्वात् । वा प्रवचनकौशलम् अथोच्यते इति शेषः; ' पुण छब्भेयं तं ' ति, तत्पुनः समासतः षड्भेदमित्येवं योजनीयम् । ' भणितम् ' उक्तं गणधरादि-

भिरिति गम्यते । तत्रापि सूत्रे एव समस्तजन्तुजातहिताऽर्धमागधभाषोपनिबद्धाऽविरुद्धार्थशब्दसंदर्भरूपे एव जिनेन्द्रभणिते अर्थतस्तीर्थकरोपदिष्टे; शब्दतस्तु गणधरदृब्धेऽपि परम्परया तीर्थकरापेदिष्टत्वमेव । तदुक्तम्--" अत्थं भासइ अरिहा, सुत्तं गंथन्ति गणहारा निउणं " इति । कौशलं तदुपदिष्टत्वज्ञाननैपुणम् । तावच्छब्दः क्रमार्थः । अर्थकौशलाद्यपेक्षया ' प्रथमं ' पूर्वं, ' तुः ' एवकारार्थो योजित एव, सूत्रस्यादिप्रतिपादकत्वेन प्राधान्यविवक्षया तत्कौशलस्य प्रथममभिधानम् । इति गाथार्थः ॥ १ ॥

तदेवाह—

जाणइ जिणिंदभणियं, एयं पुव्वावरेण अविरोहा । एयं पुव्वावरबाहियं तु जिणभासियं तं नो॥२॥

व्याख्या—' जानाति ' सद्गुरुशुश्रूषादेर्निश्चिनोति ' जिनेन्द्रभणितं ' तीर्थकरप्रणीतम् ' एतत् ' प्रत्यक्षोपलभ्यमानमाचाराङ्गादिकम्, कुतः? इत्याह—पूर्वापरेणाऽविरोधात्, सूत्रपूर्वभागोपदिष्टोऽर्थोऽहिंसादिरुपचारात् पूर्वं इत्युच्यते, एवमपरोऽप्यर्थ एव । ततश्च पूर्वस्यापरेण हिंसादिप्रतिपादकत्वेनाऽविरोधादानिषेधनात् । नहि पूर्वमहिंसादकं प्रतिपाद्य पश्चाद्धिंसादिकं प्रतिपादयत्येतदिति भावः । एतदेव च जिनेन्द्रभाणितमित्यभिदधताऽभिव्यञ्जितं वितथाविरुद्धाभिधानाऽव्यभिचारिकारणरागादिदोषजेतृशिरोमणयो हि जिनेन्द्राः । ते चाप्ताः कथं विरुद्धं भाषिष्यन्त इति । यथा च वीतरागस्याऽविरुद्धभाषित्वमेव तथा प्रथमस्थानकविवरणेऽभिहितमिति । ततश्च पूर्वापराविरुद्धं यत्सूत्रं तदेव जिनेन्द्रभाषितमेवेति निश्चिनोतीति ।

उपलक्षणं चैतत्, तेन शेषसूत्रलक्षणयोगादपीति द्रष्टव्यम्। तच्चेदम्–" पुव्वावरसंजुत्तं, वेरग्गकरं संततमविरुद्धं । पोराणमद्धमागह–भासानिययं भवइ सुत्तं ॥ १ ॥ इति अन्वयेन प्रतिपादितोऽप्यर्थः पुनर्व्यतिरेकेण प्रतिपाद्यमानः सुदृढसंस्कारणं भवतीति व्यतिरेकमाह–' एतत्तु ' एतत्पुनः श्रुति–स्मृति–प्रज्ञापारमितादिकं ' पूर्वापरबाधितं ' " न हिंस्यात् ˚-भूतानि " इत्याद्यभिधानेऽपि पूर्वं, पश्चाद् यागादौ प समालभनाद्यभिधायकत्वात् । ' तुः ' पुनरर्थो योजित एव । यस्मात्पूर्वापरबाधितं ' तत् ' ' तस्माद् ' जिनभाषितं नो ' नैव एतादिति । अत्रापि पूर्ववा नशब्दोपादानमाप्तत्वव्यञ्जनार्थमेव, ततः कथमेवंविधं वीतरागो ब्रूयादिति निश्चिनोति । इति गाथार्थः ॥ २ ॥

किञ्च—

परवयणं वा एयं, ज र आ ि ठि पव े। जम्हा यमहि ारो, ए तहा निग्ग ो क ा ॥३॥

व्याख्या—' परवचनं वा ' पूर्वपक्षवादिवाक्यम् ' एतद् ' इति वा जानाति सूत्रकौशलवानिति प्रक्रमः । त एतद् ? इत्याह–' यद् ' यस्माद् एतस्मिन् वाक्ये ' आशङ्कितं ' निषिद्धमपि कर्तव्यतया प्रसञ्जितम् । यथा–" चेइयपूया किं वइर–सामिणा मुणियपुव्व रेणं । कया पुरीए तइया, मुक्खंगं सा वि साहूणं " ॥ १ ॥ यदा ाशङ्कितमेवैतादिति जानाति तदाऽनेनैवायमाशङ्कितरूपः स्थितः पक्षासिद्धान्तप्रतिष्ठितार्थवचनलक्षण इत्यपि जानातीति गम्यते । एतदपि कुतः ? इत्यत ाह–' यस्मादयमाधिकारः, ' एषोऽर्थविशेषाभिधानप्र मः साधूनामसदालम्बनपरिहारेणैव विशुद्धशुद्धिसंयमः

शिवाय कल्पते, न तु वैरस्वामी–सङ्गमस्थविरादिविहितबृहत्कारणिकचैत्यभक्तिनित्यवासित्वाद्यालम्बनपरिग्रहणेत्येवंरूपः। तथा
च तत्रैवोक्तम्–" आलंबणेण केणइ, जे अन्ने संजयं पमायन्ति। न हु तं होइ पमाणं, भूयत्थगवेसणं कुज्जा " ॥ १ ॥
तथेति समुच्चये, निगृह्यते परवचनं निराक्रियतेऽनेनेति निग्रहः प्रत्युत्तरवाक्यम्। ततो यस्मात्कारणादेष चायं चात्र निग्रहो
निराकरणवचनम्–" उहावणा परेसिं सा तित्थउब्भावणं च वच्छल्लं। न गणेति गणेमाणा पुव्वुव्वियपुप्फमाहिमं च "
॥ १ ॥ ततो यद्येतत्परवचनं न स्यान्नैतस्य निग्रहः स्याद्, अस्ति चायं निग्रहः, इत्येवंरूपाच्चर्कान्निश्चिनोति नूनं " चेइय-
पूया किं " इत्यादिकं परवचनमेवेति। यद्यप्यत्र तदर्थपर्यालोचनेनैव पूर्वपक्षोत्तरपक्षत्वानिर्णयः, तथापि नैतदर्थकौशलं, तद्-
द्वारेणाप्येतत्परवचनमेवदुत्तरवचनमित्येवंरूपतया सूत्रस्यैव प्राधान्येन प्रतीतेः सूत्रकौशलमेवेति। उपलक्षणं चैतत् कल्पादि-
च्छेदश्रुतोक्तानां व्यवहारनिश्चयनयस्वसमयपरसमय–संज्ञादिसूत्राणां तदुच्चारणाविधेश्च। तदुक्तम्–" सन्नाइसुत्ताण व,
अंगाणंगाइयाण वेगयरं। उस्सगाऽववायाण व, एगयरमिमं ति जं मुणइ ॥ १ ॥ पयवक्काण सच्छेयं, उदत्तअणुदत्तमा-
इवन्नाणं। जं उच्चारणमणहं, एयं वा सुत्तकोसल्लं " ॥ २ ॥ इति गाथार्थः ॥ ३ ॥

अथ सूत्राभिधेयत्वादर्थस्य तत्कौशलमाह—

अत्थे य कोसल्लं, पुण अणुवउत्ताइभासियमिणं तु। एयं उवउत्तेण, ठिएण भणियं वियाणाहि ॥ ४ ॥

व्याख्या—सूत्रे तावदुक्तं कौशलम्। ' अर्थे ' तदभिधेये पुनरेतत्कौशलं यद् गुरुविधीयमानव्याख्यानादौ सता-

त्पर्यस्तदवगमः, तत्र चाऽनुपयुक्तादिभाषितमेतदिति जानातीति योगः । तत्राऽनुपयुक्तः कार्यान्तरव्यासङ्गादिनाऽप्रणिहितमनाः, आदिशब्दात्कषायादिदूषितास्थितादिग्रहः, स हि कदाचिद्विपर्यस्तमपि भाषते व्यासक्त्युपप्लुतचित्तत्वात्, ततश्च तेन भणितं भाषितमिदं श्रूयमाणसूत्रं 'तुः' वाक्यान्तरापेक्षया विशेषणार्थः, तेन एतत्पुनः 'उपयुक्तेन' प्रणिहितमनसा एतच्च 'स्थितेन' कोपाद्यदूषितचेत भणितमिति विशेषेण जानाति, न तु मुग्धवत्संमुग्धमर्थमात्रमवबुध्यते इत्यर्थः । कौशल मेवमन्यत्रापि द्रष्टव्यम् । इति गाथार्थः ॥ ७ ॥

तथा—

अविहिकया वर , असूयावयण भणन्ति समयण्णू । पायच्छि अकए, गरुयं वितहंकए लहुयं ॥५॥

व्याख्या—'विधिः' आप्तोपदेशः, तद्विपरीतस्तु विधिः तेन 'कृतं' विहितं चैत्यवन्दनकादिकमनुष्ठानमिति :, तस्माद् 'वरं' म क् श्रेष्ठम् 'कृतं' सर्वथैवाऽननुष्ठितमिति 'असूयावचनम्' इति पारिणामिकतया वक्तुरक्षमावचनमेतदिति 'भणन्ति' प्रतिपादयन्ति, 'समयज्ञाः' सिद्धान्तरहस्यविद इत्यपि जानात्यर्थकौशलवान् । कुतः ? इत्यत आह—'प्रायश्चित्तं' विशुद्धिहेतुतपःप्रभृतिकम् 'अकृते' सर्वथाऽननुष्ठिते 'रुकं' महत्तरम्, 'वितथकृते' किञ्चिदविधिकृते पुनः 'लघुकम्' अल्पतरमभिहितमागमे इति गम्यते । तथाहि जीतकल्पाभिप्रायेण "फिडिए सयमुस्सारिय" इत्यत्र कथञ्चित्प्रमादेन आचार्यादेः सकाशात् प्र मेव त्रिः कायोत्सर्गोर रेण वन्दकदाने वा उत्कर्षतोऽपि चतुर्लघुक-

मेवोक्तम्; सर्वथाऽप्यकरणे तु चतुर्गुरुकमिति। ननु यद्येवं तदा कथमविधिचैत्यवन्दनामुद्दिश्य " होइ य पाएण सा किलिट्ठसत्ताणं " इत्याद्युक्तम्? अविधिवन्दनकमप्युद्दिश्य " किइकम्मं पि कुणंतो, न होइ कियकम्मनिज्जराभागी" इत्याद्युक्तम्? तस्माद् " अविधिकृतादकृतं वरम् " इत्येतन्नाऽसूयावचनं, समीचीनत्वात्; इति चेद्, नैवं, शैथिल्याऽशैथिल्यादेरिह प्राधान्येन विवक्षितत्वात्। यत्र हि शक्तोऽपि शैथिल्यादेरविधिना करोति तत्र तत्कारणं विपरीतफलमेवेत्यत्र न विप्रतिपत्तिः। यत्र तु सम्यक्करणकृतबुद्धिर्ग्लान्यादेरशक्तः सन् किञ्चिदविधिनाऽपि करोति तत्र तत्सफलमेव। इति आशैथिलादिकमाश्रित्य नाविधिकृतादकृतं वरमिति भावः। इति गाथार्थः ॥ ५ ॥

तथा—

नरगाइ मंस–रुहिराइ,–वन्नणं जं पसिद्धिमित्तेणं। भयहेउ इहर तेसिं, वेउव्वियभावओ न तयं ॥६॥

व्याख्या—' नरकादौ ' दुर्गत्यादिस्थाने ' मांस–रुधिरादिवर्णनं ' मांसाद्याशिनस्तत्र तच्छरीरोत्कर्तितपिशितादिखण्डान्येव भोज्यन्ते परमाधार्मिकैरित्याद्युपदर्शनं क्रियते श्रुतधरैर्नारकाणामिति शेषः। अथवा नारकादीति उपचारात्तत्स्था नारका एवोच्यन्ते, ततो नारकाणां मांसादीत्यादि योज्यम्; आदिशब्दाद् वसापूतादिग्रहः। एतत्सर्वं प्रसिद्धिमात्रेण धातुमयानि पञ्चेन्द्रियशरीराणीति सामान्यजनप्रतीत्यैव; न तु सिद्धान्तानुसारेण, यद्येवं तत्किमित्युपवर्णनम्? अत आह ' भयहेतोः' पिशितादिलोलानां त्रासोत्पादनार्थम्। इतरथेति प्रसिद्धिमात्रं विहाय सिद्धान्तानुसारेण पुनस्तेषां नारकाणां ' वैक्रिय-

भावाद् ' वैक्रियत्वात् । अत्र च शरीर-शरीरिणोः कथंचिदभेदाद् वैक्रियत्वाभिधानं दृश्यम् । अथवा ' वैक्रियभावाद् ' वैक्रियशरीरत्वात्तेषां ' न ' नैव तन्मांसादिकम् । इति गाथार्थः ॥ ६ ॥

तथा—

विसयविभागेणं पुण, ु ं किंचि । उ यारे । जु ं उव रणं जह, हे ं ताइक मे निसरे ॥७॥

व्याख्या—साध्वाद्याचारस्य हि ' विषयो ' गोचरः साध्वादिः, तस्य ' विभागो ' अवान्तरविशेषः स्थविरकल्पिकादिः । ततश्च किञ्चित्पुनः सूत्रं तथाविधार्थोपदेशलक्षणं विषयविभागेनेदं स्थितमिति जानाति । तदेव सूत्र रो दृष्टान्तार्थमाह—' यथैव ' येन प्रकारेण ' ाचारे ' प्रथमाङ्गे एतदर्थं सूत्रमस्ति यदुत जीर्णं परिशाटितप्रायम्, उपक्रियते-अनुगृह्यते संयमोऽनेनेति उपकरणम्—पात्रकल्पादिभाण्डम्, यदि चेद्भवेत् कथञ्चित्साधोस्तदा ' हेमन्तातिक्रमे ' शीत लापगमे ' निःसृजति ' परिष्ठापयति सा ः, संयमानुप मकत्वेन तस्याधिकरणत्वात् । तथा च तत्र प्रथमश्रुतस्कन्धाऽष्टमाध्ययनचतुर्थोद्देशकेऽभिहितम् " ह पुण एवं जाणि । उवाइक्कंते खलु हेमंते, गिम्हे पडिवन्ने, हापरिजुन्नाइं वत्थाइं परिठवेज्जाइ " । इति थार्थः ॥ ७ ॥

एतच्चाऽर्थकौशलवान् विमृश्यैवंविषयविशेषे व्यवसि मिति निश्चिनोति । कथमित्याह—

चोद्दस उवगर । ं, अवस्स । ं जंतें । वि नि एयं, जि प्पी ं ओ ं ॥ ॥

व्याख्या—चतुर्दशसंख्यान्युप ानि " पत्तं पत्ताबंधो, पायट्ठव ' च पायकेसरिया, पडलाइं रयत्ता ", गुच्छगाओ तिन्नि पं ागा ॥१॥ रयहरणं हपत्ती मत्त ो चोलपट्टो य " । एतानि ' श्यं ' नियमेन ' उक्तानि ' प्रतिपादितानि, तावदिति किमा ां श्रुतधरैर्धार्यतयेति ेषः । ' जं तेसिं ति ' यदिति यस्मात्कारणात् तेषामिति साधूनाम् । तदुक्तम्—" चोद्दस उवगरणाइं स रियव्वाइं थेरेहिं " ति । प ान्तरपक्षे तन्त्रेष्विति शास्त्रेषु निशीथादिषु, साधूनामिति तु प्रक्रमाद् गम्यते । दिति संप्रत्युपलभ्यमानतया प्रत्यक्षं, तदिति यदुपकरणं परिष्ठापकतयोपात्तं, ' : ' वधारणे, स च जिनकल्पिकानामेवेत्यत्र योज्यते । जिनकल्पिकानामवश्यं चतुर्दशोपकरणवत्त्वस्य विधा द्धेतोस्तदेतदाचाराङ्गसूत्रं जीर्णोपकरणव्युत्सर्गप्रतिपादकं । जिन ल्पिक ामेव केवलोत्सर्गकल्पं, दुरनुष्ठेयानुष्ठानविशेषनिष्ठसाधूनामेव विषये ' निपतति ' तंते इति । न प्रत्येकबुद्धादिरेवात्र किमिति न गृह्यते, तस्यापि विषयविशेषत्वात् ? । नैवम्, प्रत्येकबु ानां तावद् विविधनवविधोपकरणवत्त्वस्य जघन्योत्कर्षाभ्यामवश्यंभावित्वात्, स्वयंसंबुद्धसाधूनां तु द्वाद त्रिधो धित्वस्यैव प्रतिपादनात्, ततो जिनकल्पिकानामेव " दुग तिग चउक्क पणगं, नव दस इक्कारसेव बारसगं । एए अट्ठ विगप्पा, जिणकप्पे हुंति उवहिस्स " ॥ १ ॥ इत्यादिना विधत्वस्यापि संभवेन जीर्णैकाद्युपकरणव्युत्सर्गेऽपि सिद्धान्तव्यापकभावात्तेषामेवात्र ग्रहणं युक्तमिति सूत्रं जिनकल्पिकानामेव तत् । इति गाथार्थः ॥ ८ ॥

तथा—

अ म्मि उव ते, पसंगओ जत्थ ाहए । व , इ पत्थु व ||९||

व्याख्या—' अन्यस्मिन् ' कस्मिंश्चिदर्थे ' उपक्रान्ते ' प्रारब्धे प्रतिपादयितुमिति शेषः । 'प्रसङ्ग(तः)' इति, तस्यैवार्थस्य कथनानुषङ्गेण यत्र स्थाने ' साधयति ' प्रतिपादयति, ' अन्यं ' प्रक्रान्तादर्थादर्थान्तरप्रतिपादनम । ' ' निश्चयेन, ' कटाक्षवचनमिति ' कटाक्षोऽपाङ्गनिरीक्षणं, तदिव यदभिधानं तत्कटाक्षवचनम् । यथाहि संमुखीनं पदार्थमलोकयन्नेव कामुकादिः कमनीयकामिनीप्रभृतिकं तिर्यगवस्थितमपाङ्गेन निरीक्षते, एवं प्रस्तुतमभिदधानस्यापि तत्प्रसङ्गेनाऽप्रस्तुतस्य यदभिधानं तत् कटाक्षवचनम् । यथौघनिर्युक्तौ उपकरणद्वारे—" अज्झत्थविसोहीए, उवगरणं बाहिरं परिहरंतो । अपरिग्गहो त्ति भणिओ, जिणेहिं तिलोकदंसीहिं " ॥ १ ॥ इत्यादिना मूर्च्छादिरहितः कल्पादिक प ज्ञानोऽपि अपरिग्रह इति वचनं, तथाविधोपकर भोगं मोक्षाङ्गतया समर्थयदेव दिगम्बरमतमपाकरोति । तच्चाऽपाकरणमप्रस्तुतमेव, केवलं प्रस्तुतार्थाऽबाधकतया तत्प्रसङ्गमात्रेणोपात्तमित्याह—' न भवति तत्प्रस्तुतमवश्यम् ' इति सुगमम् । य पुनरुक्तत्वं नाशङ्कनीयम्, उपदेशत्वाद्, व्यतिरेकद्वारे विनेयानां सुदृढप्रतिपत्तिनिमित्तत्वाद्वा । इति गाथार्थः ॥ ९ ॥

तथा—

पडिव ह जिणदेवं, विरओ दे व्वओ वावि । एयं हा णि , । इ गो सु हो ||१०||

व्याख्या—भो भव्याः ! ' प्रतिपद्यध्वम् ' आश्रयध्वं मोक्षा तया ' जिनदेवं ' वीतरागदेवताम्, तदाश्रयणस्यैव

परंपरया मुक्तिहेतुत्वात् । तथा 'विरतिं' निवृत्तिं च प्राणिवधादेरिति शेषः, 'देशेन' इत्येकदेशतः स्थूलप्राण्यादेर्द्विविध-त्रिविधादितश्च । 'सर्वतोऽपि वा' सर्वप्रकारेण स्थूलसूक्ष्मत्रिविधत्रिविधरूपेण, वाशब्दो द्वयोरपि निवृत्त्योरसाक्षात्साक्षाच्च मोक्षनिदानयोः शक्तिश्रद्धानुसारेणाश्रयणीयत्वविकल्पप्रतिपादनार्थः । 'एतद्' एवंरूपं वचनं 'स्वभावभणितं' नैसर्गिकोपदेशरूपं, न तु भयादिसूत्रवत् कारणान्तरजम्, इति 'जानाति' बुध्यते सोऽर्थकौशलवान् श्रावकः अर्थकौशलादिति । अत्रार्थस्य सूत्राभिधेयत्वादुपचारेण सूत्रशब्देनार्थोपादानं द्रष्टव्यं, ततोऽर्थनैपुणात् । इति गाथार्थः ॥ १० ॥

उक्तमर्थकौशलम् । अथाऽर्थविशेषत्वादुत्सर्गापवादयोस्तत्स्वरूपोदाहरणरूपफलप्रतिपादनपुरस्सरं तत्कौशलं गाथात्रयेणाह—

सामन्नविही भणिओ, उस्सग्गो तव्विसेसिओ इयरो । पाणिवहाइनिवित्ती, तिविहं तिविहेण जावीवं ॥११॥

पुढवाइसु आसेवा, उप्पन्ने कारणम्मि जयणाए । मिगरहियस्स ट्ठियस्स, अववाओ होइ नायव्वो ॥१२॥

सव्वन्नुप्पामन्ना, दुन्नि वि एए समासओ सुक्खं । मिस्सं पत्ता सेवण, कोसल्लं इत्थ नायव्वं ॥ १३ ॥

व्याख्या—'सामान्यः' सर्वसाध्वादिसाधारणो 'विधिः' अनुष्ठानं 'भणितः' प्रतिपादितो जिनैः 'उत्सर्ग' उत्कृष्टः समाचारः । तस्मादेवोत्सर्गाद् 'विशेषितो' देश-कालादिकारणैर्भेदितः, अथवा स एव तैर्विशेषितः । किमित्याह—'इतरो' अपवादः सामान्यविधिबाधारूपो भणितः । उत्सर्गापवादयोस्तत्र तत्र साहचर्याभिधानोपलम्भात्

अक्रमाद्वा इतरशब्देनात्राऽपवादग्रहः । अ स्यादोहरणमाह—' प्राणिवधादिभ्य ' आश्रवद्वारेभ्यो ' निवृत्तिः ' विरतिः, त्रिविधं त्रिविधेन करण–कारणा–ऽनुमतिभिर्मनो–वाक्–कायैः ' यावज्जीवम् ' आजन्म साधूनामित्युत्सर्गो ज्ञातव्य इति योगः ॥११॥ अथ द्वितीयस्योदाहरणम्—' पृथिव्यादिषु ' लवणादिरूपेषु षट्स्वपि जीवनिकायेषु विषयेषु ' आसेवा ' मर्यादया मनाग् निषेवणम्, एषामुपमर्दनमित्यर्थः । ' उत्पन्ने ' संजाते ' सति ' कारणे ' तदासेवनहेतौ ग न्यादावत्यन्तमधिसोढुमशक्ये, न तु यथाकथञ्चित्, तत्रापि ' यतनया ' रक्षितुं शक्यजीवर लक्ष या, न तु निःशूकतया प्रसरेण । तथा च यतनास्वरूपमुक्तम्—" जीए पभूययरास–प्पवित्तिविणिविचिलक्खणं वत्थुं । सिज्झइ चिट्ठाए जउ, सा जयणाए विवईमि " ॥ १ ॥ अत्र चाज्ञया आप्तोपदेशतो विपदिति ग्लान्याद्यापदि, मृगा इव मृगा मुग्धा भिनवदीक्षितादयोऽपरिणतभावाः, तै ' रहितस्य ' वर्जितस्य, तदसन्निहितस्येत्यर्थः । तत्रापि ' स्थितस्य ' चारित्रे सम्यग स्थितभावस्य सतः साधोर्यत्पृथिव्यादिनिषेवणं तद् अपवादो भवति ' ज्ञातव्यो ' बो व्यः, सामान्यविधिबाधारूपत त् । तथा च सम्यक्चारित्रिणोऽधिकृत्योक्तम्–" असिवे ओमोयरिए, रायपउट्ठे भए व गेल ` । एमाइकारणेहिं, हा माइ जयणाए " ॥ १ ॥ ततोऽयमत्र भावः–यो ह्यस्थितोऽपरिणतसाधुसमक्षं चाऽतिप्रसरेण निष्कार मेव चाऽऽसेवते, नाऽसौ अपवादवर्ती, किन्तु तदाभाससमाचारः, ब्वाभास एवेति, न तदनुष्ठानमपवाद इति । नन्व ोत्सर्गबाध पत्वात् कथं मोक्षाङ्गता ?, स्यैव वा तदङ्गत्वे कथमुत्सर्गस्य ? इत्यत आह–' सर्वज्ञप्रामाण्यात् ' त्रार्थे सर्वविदोऽवधेयवचनत्वाद् द्वावप्येतौ उत्सर्गापवादौ, नैक एवाऽनयोः, किमित्याह–' मोक्षः ' त्स्नकर्मक्षयलक्ष :, कारणे कार्योप रान्मोक्षकारणे

अप्येतौ मोक्ष इत्युक्तम् । ' सतः ' स तत्वेन सिवनामपेक्ष्य स्वस्वकालयोः संघटितत्वेन । यदि : सर्वसाधुरुत्सर्गेणैव केवलेन सर्वदा प्रवर्तेतं तदा दुरवस्थानामवश्यंभावित्वात् संहनननामदृढत्वाद् * युषां सोपक्रमत्वा ऽऽत्मनः परि ।-मानामपि चञ्चलत्वात् तीर्थस्यापि नाऽनुवृत्तिः स्यादित्यर्थः । एतदुक्तं भवति—सर्वज्ञो हि परमाप्तत्वा कस्याप्यहि ादी, स चोत्सर्गापवादयो तदवस्थादिविशेषेऽनुष्ठीयमानयोरपवर्गहेतुत्वमवगम्य तथैव प्रणीतवान् । न चैतदनुपपत्तिकम्, वस्थाविशेषे रोगिणः कटुकौषधाद्युपभोगवद् आधाकर्मिकादिभोग ापि संयम रीरोपष्टम्भकत्वेन हितहेतुत्वात्, तज्जन्यपात स्य तु पश्चात् प्रायश्चित्तादिना शोध्यत्वात् । पुष्टाङ्ग तु निर्निमित्तं तदुपभोगः केवलं लौल्यमाविर्भावय हितहे ः । इत्यशठेन स्वस्वकाल एवैतदनुष्ठानाद यं मोक्षः प्राप्यत एवेति न कश्चिद्विरोधः । एवमनयोः स्व प—फलविज्ञानपूर्वकं श्रं पूर्वोक्तयुक्त्या परस्परसंघटिताप्राप्तयोः सेव्यत्वेन सन्निहितीभूतयोरासेव नं यत्तत् कौशलं नैपुणमत्र इत्युत्सर्गा ।-दयोर्ज्ञातव्यं—बोद्धव्यं श्रावकेण । इति गाथात्रयार्थः ॥ ११–१२–१३ ॥

उक्ते समाचारविशेषरूपोत्सर्गापवादकौशले । अथ समाचारसामान्यरूपव्यवहारकौशलमाह—

हारे ेसल्लं, धम्मे अत्थे, य ोगे । धम्मे तितिथिव , ितिथविं ाण विक्किणणं ॥१ ॥

व्याख्या—शिष्टजनाऽनिन्द्यः समाचारो व्यवहारः, तत्र ' कौशलं ' तज्ज्ञानपूर्वकप्रवृत्तिनैपुणम् । त विषयभेदाच्चतुर्धा, ते च विषया धर्मादयः प्रतीतस्वरूपा एव । ततश्च ' धर्मे ' कृते तत्साधने च विषयभूते यो व्यवहारस्तत्र ।

एवमर्थकामव्यवहारयोरपि । लोकव्यवहारस्तु शिष्टसमाचार एव । तत्रापि चशब्दौ समुच्चयार्थौ, तत्रापि प्रथमं तावत्प्राधान्याद्धर्मव्यवहारकौशलमाह–' धर्मे ' पदसमुदाये पदस्योपचाराद्धर्मव्यवहारकौशलमिति योगः । ' कुतीर्थिनां ' शाक्य–भूत–दिगम्बर–विप्रादीनां ' वर्जनं ' तत्पूर्वालाप–प्रणाम–दानाऽनुप्रदानादिसंसर्गादीनां तद्देवतानां च तदुपदिष्टश्राद्ध–पिण्ड–प्रदानादीनां च परिहारेण सर्वथोत्सर्जनं, तत्संसर्गादेरतीचारत्वेन सम्यक्त्वस्य मालिन्यहेतुत्वात् । ' कुतीर्थिबिम्बानां ' तदाराध्यहरि–हरादिप्रतिमानां विक्रयणस्य वर्जनमिति संबन्धः, षष्ठ्यर्थे द्वितीया प्राकृतत्वात् । यदा चैतान्यपि न विक्रीणीते तदा जिनबिम्बविक्रयो दूरापास्त एव, सर्वप्रकाराराध्यजिनबिम्बविक्रयणार्थलाभस्य तत्त्वतो महाऽनर्थलाभरूपत्वात् इति गाथार्थः ॥ १४ ॥

तथा—

वज्जेइ चेइयालय–दव्वं अंगोवरिम्मि द्धारं । ।ारणं च एवं, जाउ से पुंभयं लेइ ॥१५॥

व्याख्या—' वर्जयति ' परिहरति ' चैत्यालयद्रव्यं ' देवगृहसमुद्गकादिद्रविणम्, 'अङ्गोपर्युद्धारम् ' इति प्रागुक्तार्थम् तथा गृहीत्वा नो भुङ्क्ते इत्यर्थः । ' साधारणं च ' तथाविधापद्गतसाधर्मिकाद्युपभोगयोग्यतया तुल्यं च द्रव्यं यत्तदप्येवं जिनद्रव्यवन्नाऽङ्गोपर्युद्धारं गृह्णाति, देवद्रव्य–साधारणद्रव्ययोर्हि वर्धनादौ शास्त्रे तुल्यत्वश्रुतेरियमुक्तिः । तथा चोक्तम् "देवस्सं नाणदव्वं च, साहारणधणं तहा । सावएहिं तिहा काउं, नेयव्वं वुड्ढिमायरा " ॥१॥ तथा–" चेइयदव्वं साहा–रणं च जो

दुहइ मोहियमईओ । धम्मं च सो न याणइ, अहवा बद्धाउओ नरए " ॥ १ ॥ ततश्च तथोद्धारग्रहणे मूलनाशस्यापि संभवात् । तथा च देवद्रव्यविनाशे शङ्काशादिश्रावकवद् महाऽनर्थभागित्वप्रसङ्गाभाऽङ्कोपरि तदुद्धारग्रहो युक्त इति । तथाऽनेनैव ' जातु ' कदाचित् ' से ' इति तस्य जिनद्रव्यस्य वा साधारणद्रव्यस्य वा ' पुंभकं ' परंपरा, तदुपयोगनिदानमवस्त्वन्तरोपयोगरूपं ' लाति ' गृह्णाति, तद्ग्रहणेनापि तदुपभोगं न करोति । इति गाथार्थः ॥ १५ ॥

पुम्भकस्वरूपमाह—

तद्दव्वरिणियजायण, विट्ठीए सगड-बइल-मणुयाणं । अहवा वि खरालिंह, करेइ तद्दव्वकयगाणं ॥१६॥

व्याख्या—'तद्द्रव्यऋणिकेभ्यः' कदाचिद् वृद्ध्यादिनिमित्तवितीर्णजिनादिद्रव्यऋणिकेभ्यः सकाशात् केनापि मुग्धलुब्धश्रावकेण ' याचनं ' प्रार्थनं गृहीत्वापि, तदुपयोगविधानमिति यावत्, विष्ट्या स्वद्रव्यदानमन्तरेणैवमेव मुधिकया शकट-बलीवर्द-मनुजानां प्रतीतानाम् ऋणिकस्यैव संबन्धिनाम् एतत्पुंभकम् । उपलक्षणं चैतत्, अन्यदपि यद्देवद्रव्योपजीविनः सकाशात् तद्दाक्षिण्येनैव स्वगृहे व्यापारादिकं कार्यते तदपि पुंभकम्, पारम्पर्येण देवादिद्रव्योपभोगरूपत्वात् । अथवेति प्रकारान्तरे, तद्द्रव्यक्रायकाणां देवादिद्रव्यकलान्तरप्रयोगग्राहिणां सूत्रधारादीनां संबन्धित्वेन ' खरश्लक्ष्णिकां ' खरान् मुद्रादिद्रव्यसंपूर्णान् देवादिसंबन्धिनो द्रम्मादीन् आत्मना गृहीत्वा स्वकीयान् द्रम्मादीनेव श्लक्ष्णान् द्रव्यादिहीनान् ददाति यस्यां वाणिज्यायां सा खरश्लक्ष्णिका, तां ' करोति ' विधत्ते । एतदप्युपलक्षणम्, तेन यद्देवसंबन्धि किञ्चिद्वस्त्वा-

द्युत्कृष्टं मूल्येन गृह्णाति, स्वद्रम्मादींश्च मूल्यरूपाद् हीनान् ददाति, तदपि पुंमकम् । इति गाथार्थः ॥ १६ ॥

अथोपदेशमाह—

एवं · · इ, वज्जइ निह चु तु । वड्ढेइ य तद्दव्वं, विसु ावो ॥ १ ॥

व्याख्या—एतत्पूर्वोक्त ारं पुम्भ पि 'न करोति' न विधत्ते श्राद्धः 'स ाद्' अन्यवधानेन पुनस्तद्द्रव्यमिति योगः । 'वर्जयति' परिहरति, इत्येतत्किमिह प्रवचने 'आश्चर्यम्' अद्भुतं न किं दित्यर्थः । "देवस्सपरीभोगो णंत मेसु दारुणविवागो" इत्यादि जानन् कथं सकर्णः साक्षात् पारम्पर्येण वा तदुप तीति । 'वर्द्धयति च' थानकलान्तरप्रयोगादिना वृद्धिं च नयति 'तद्द्रव्यं' जिनादिद्रविणं 'विशुद्धभावो' निराशंसमानसः 'सदाकालं' सर्वदा । इह च सदाशब्दोपादानादेव शश्वद्वर्धने लब्धे कालशब्दोपादानं तद्वृद्धेरत्यन्तविधेयताप्रतिपादनार्थं, चशब्दाद् रक्षति चेति द्रष्टव्यम् । "जिणपवय ड्ढिकरं, पभावगं ना -दंसणगु णं । रक्खंतो जिणदव्वं, परित्तसंसारिओ होइ" ॥ १ ॥ तथा—"वड्ढंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो" । इत्यादि तद्द्रव्यरक्षणादिफलं जानन् यो रक्षति वर्धयति चाऽसौ धर्मव्यवहारकौशलवान् । इति गाथार्थः ॥ १७ ॥

अथ धर्मफलत्वादर्थ- मयोस्तत्रापि कामसाधकतमत्वादर्थस्य पूर्वं तत्कौशलं : कामकौ लं च गाथाद्वयेनाह—

अत्थे पुण ोसल ं, अवंझफलयं धरेइ सो भंडं । कामे पु को ल ं, अणुणेइ पियं ेणं ॥ १८ ॥

ण णेइ भोग ।, द्धिं वेइ वे रिं । ल वइ ०।, इत्थी र गो । ॥१९॥

व्याख्या—धर्मे तावदुक्तं कौ म्। ' र्थे ' द्रव्ये पुनरेतत्कौ लं यदतिपतितत्रेचकगृहीतत्वादिना ' अवन्ध्यम् ' श्यं भाविफलं लाभलक्षणं यस्मात्तदवन्ध्य दम्, ऽवन्ध्यं च तत् लदं चेति र्मधारयः । ' स ' इति वकः, ' धारयति ' भाण्डशालादिषु स्थापयति, ' भाण्डं ' म-र्मा ादिद्रव्यम् । वः—स्वमातिमाहात्म्य मतिमत्परमामि-त्रादिवचन । भाण्डं सम्यक्परीक्ष्यैव तद्धारयति यद् बहुफलं भवति, इत्येतद् र्थव्यवह ौ म् । ' ' संभोग-व्यवहारविषये पुनरेतत्कौशलं यद् ' नयति ' साम-दानादिना प्रसादयति ' प्रियां ' भा ' प्रयत्नेन ' आदरेण, अन्यथा तु हवासो धर्मो छ्ठाननिष्ठनिरन्तरचि ासारोऽपि दुः निरेव स्यात् । त च ते—" अहिरण्य-मदासीकं, गृहं गो वर्जितम् । तिकू कलत्रं च, नरकस्यापरो धिः " ॥ १ ॥ इति । तथा—' पयति ' स्नानं कारयति ' भोग ' भाविसुरतसमये, अनेन बहिः हि रुक्ता, अन्यस्या अप्येवं-विधाया उपल ार्थम् । तथा ' द्धि ' गण्डूषादिना वदनशोधनं कारयति, नेन चाऽन्तः : । उभयं चैतत् कार्मणादिनिमित्तयोगवर्णविले गुलिकादिशङ्काऽपनोदाय विधाप्यते । ' वेश्यास्त्रियं ' साधार योषितम् । त्र च साधार ि योऽपि ादनादिविधानोपदर्शनेन भावकौ लेऽपि त्रवेश्यानां भाव रिज्ञानाभिधानेन परस्त्रियः सर्वथा त्याग एव श्राद्धस्येति सूचितम् । ' उल्लपति ' विश्वासवशेन प्रभाषते ' न ' नैव ' स ावं ' रहस्यवर ' स्त्रीणां '

सामान्येन योषितां मात्रादीनामपि, किं पुनर्वेश्यानां 'पुरतो' अग्रतः सदाकालमिति पूर्ववत्। स्त्रियो हि तुच्छताऽतिशयाद् रहस्यं चेतसि धारयितु र्थां अवश्यं बहिः प्रकाशयन्ति, तथा चाऽनर्थसन्ततिरेव। तदुक्तम्—" तुच्छा मिणीसु, मा सब्भावं कयावि पयडेसि। तं जं डुइ तुरियं, कप्पासफलं व परिपक्कं " ॥ १ ॥ न चायं स्त्रीप्रसादनाद्युपदेशोऽसङ्गतः सावद्यत्वाद् इति वाच्यम्। शरीररक्षा रेण धर्मरक्षानिद त्वात्। यथा चाऽनयोरर्थकामोपायाभ्यां भेदस्तथा प्रागेवो म्। इति गा र्थः ॥ १९ ॥

अथाऽस्यापि त्रिवर्गस्य लोकाधारत्वाद् लोककौशल ह—

" पु कोस ', करेइ मित्तिं पहा लोगे। वच्चइ रा ', वयरइ वि ब्भावा ॥२०॥

व्याख्या—अर्थ-कामयोरुक्तं कौशलम्। 'लोके' शिष्टजनसमाचारे पुनरेतत्कौशलं यत् 'करोति' विधत्ते 'मैत्रीं' सौहार्दं 'प्रधानलोकेन' सदाचारतया सर्वोत्तमजनेन, तन्मैत्र्यस्य सकलकल्याणनिबन्धनत्वात्। तथा 'व्रजति' तत्प्रसादनार्थं गच्छति 'राजास ' ' नृपसमीपे, उपलक्षणं चैतन्नृपाभिमताऽमात्यादिसमीपस्य, तत्र गमनमात्रस्यापि ऐहिकानर्थनिवृत्तिहेतुत्वात्। तदुक्तम्—" गन्तव्यं राजकुले, द्रष्टव्या राजपूजिता लोकाः। यद्यपि न भवन्त्यर्थां, भवन्त्यनर्थप्रतीकाराः " ॥ १ ॥ 'उपचरति च' विनय-प्रियालाप-दानविशेषादिना वर्जयति च 'सदापि' सर्वदा 'सद्भावात्' निष्कपटतया, स्वामिनोऽपि । दुष्प्रतीकारत्वश्रव ात् स ावत एवोप रो युज्यते। इति

गाथार्थः ॥ २० ॥

तथा—

न भणइ अवण्णवायं, रायाईणं समक्खमसमक्खं । परिहरइ विवक्खं, से संतगुणुच्चारणं कुणइ ॥२१॥

व्याख्या—'न भणति' न भाषते 'अवर्णवादम्' अप्रशंसावचः, निन्दां न करोतीत्यर्थः । 'राजादीनां' राजा-ऽमात्य-सामन्तप्रभृतीनां, तन्निन्दाया अत्यन्तं लोकविरुद्धत्वाद् वधादिहेतुत्वाच्च । समक्षमिति क्रियाविशेषणं, ततः 'समक्षं' प्रत्यक्षं यथा भवति, तेषामेव शृण्वताम् । 'असमक्षं' तत्परोक्षेऽपि । तथा 'परिहरति' आलापसंसर्गादि-निषेधेन वर्जयति 'विपक्षं' प्रतिकूलवर्तिनं निन्दकघातुकादिकं 'से' तस्य राज्ञः, एकवचनं त्वत्र विशेषेण केवलस्यैव राज्ञो विवक्षितत्वात्, तद्विपक्षसंसर्गस्य सर्वथा महाऽनर्थहेतुत्वात् । 'सद्गुणोच्चारणं च' सद्भूतप्रजापालकत्व-प्रतापादि-सत्त्वधर्मोत्कीर्तनं च 'करोति' विधत्ते समक्षमसमक्षं च, अनेन च वाचाटतायाश्चाटुकारितायाश्च निषेधमाह, तयोः शिष्टा-चारताभ्रंशत्वात् । इति गाथार्थः ॥ २१ ॥

तथा—

सुय-जम्म-जाइसमहिय,-जणाण सययं समक्खमसमक्खं । संतगुणे उ पसंसइ, अवराहं फुसइ जत्तेणं ॥

व्याख्या—'श्रुतं' शास्त्राधिगमः, 'जन्म' उत्पादः, 'जातिः' मातृप्रभवा, उपलक्षणं चैषां कुल-शीलादीनां,

'करिष्यति' विधास्यति 'ऋणिको' अधमर्णः, 'खरेण' अतिशयेन भोजन-पानादिनिषेधरूपेण 'निरुध्यमानो' गमनागमनादिप्रतिरोधतोऽवघटनेन नियन्त्र्यमाण इति। तदा तम् 'अनुवर्तयति' प्रथममेव तद्दीयमानगवादिमात्रग्रहण-सुकुमारवचनादिना अनुकूलयति, न युध्यते तेन सह, नैव विवाद-प्रहारादिना प्रत्यवतिष्ठते। अनुवर्तनाभिधानादेव युद्धाभावे लब्धे यत्साक्षाद् युद्धाभावाभिधानं तदस्य युद्धस्याऽत्यन्तं शासनोपघातहेतुत्वेन स्वस्याऽसभ्यतापादकत्वेन च सर्वथाऽप्य-करणीयत्वख्यापनार्थम्। किं कुर्वन्? इत्याह—यन्मया लोभाद्दाक्षिण्यादेर्वा एतस्मै दत्तं 'तावन्मात्रं' तत्प्रमाणं मदीयं द्रव्यं 'गतमेव' नष्टमेव, एतस्मादस्य द्रव्यस्य सुदुष्प्राप्यत्वादिति परिभावयन्निति शेषः। यद्यपि गृहिणा(णः) सर्वार्थसंपादक-त्वेन बाह्यप्राणभूतत्वेन चाऽत्यन्तप्रियस्याऽर्थस्य एवमेव दुष्करः परिहारः, तथापि नाऽनुपायप्रवृत्तौ कार्यसिद्धिः, न खल्व-त्यन्तबुभुक्षाक्षामकुक्षिरपि कशावको नालिकेरफलव्यापारितचञ्चुस्तद्भङ्गादन्यदासादयति फलम्। तदिहापि अकिञ्चि-त्करमूर्च्छामात्रमपहाय अर्थलाभोपाये एव यतितव्यम्। स चायं यदि तदा न ददाति, तदा पुनः कालान्तरे याचते, तन्मि-त्रादिना वा तं संबोधयति। आत्मनः स्थानं-सहाय-राजादिसामर्थ्यं, तस्य तु तदभावम् द्रव्यसमृद्धिसद्भावं चाऽवगम्य गाढतरमपि निरुणद्धि, इत्येवमादिकः। तदुक्तम्—"पुणरवि पच्छावे तं, मग्गइ नाऊण नियबलं परमं। तस्स य अप्पब-लत्तं, गिहे य अत्थं वियाणित्ता" ॥ १ ॥ एवं ह्यर्थसिद्धिः, नाऽन्यथा। सर्वत्राप्यधमर्णेऽयं विधिः, विशेषतश्च क्षीणविभव-साधर्मिकादौ। इति गाथार्थः ॥ २५ ॥

अथ लोकव्यवहारसिद्धिप्रयोजनं तदाह—

र विपरि वियं, र । विन्नवेइ ो न्नू । ट्ठ प्प , णइ । रे ॥ २६ ॥

व्याख्या—'अन्यस्मै' स्वकीयामा भृत्यायाऽपि, ास्तां स्वविषये इत्यपिशब्दार्थः । 'परि पितं' ोऽपि हेतोररति द्धं, 'राजानं' भूपालम्, इङ्गिताादिभिर्ज्ञात्वेति ेषः, 'नो' नैव 'विज्ञापयति' स्व ोजनसं दनाभिमुख्ये कोमलवच ऽपि व्यापारयति 'तज्ज्ञो' विचक्षणो भावकौशलवानित्यर्थः । तर्हि कदा वि ापयति ? इत्यत ह—'सं - ष्टः' नयन–कपोलविकासाद्यभिव्यक्तप्रमोदः, 'प्रसन्नश्च' रोषाद्यभावेन सौम्यमूर्तिः, ततश्च सन्तुष्टश्चासौ श्चेति कर्मधारयः । तं राजनमेवंविधमिङ्गितादिभिरेव ज्ञात्वा 'भ ति' स्वयमेव विज्ञापयति स्वप्रयोजनं, 'भा यति वा' विज्ञापयति परेणाऽमात्यादिना । इह च तुष्टादिपदद्वयोपादानम् अवश्यमेवंविधात् कार्यसिद्धिरिति ज्ञापनार्थम्.

सर्वेष्वपि चैतेषु कृत परि ादिषु दिग्मात्रं संक्षिप्तरुचिसत्वानुग्रहार्थमुपदर्शितमुपलक्षणत्वेन, ततस्तद सारेण स्वयमेव धीभिस्तत्तत्स्थानानुगुणत्वेन, अन्यदपि तत्तत्परिकर्मादिकं तत्र तत्र निवेशनीयम् । इति गाथार्थः ॥ २६ ॥

द्राज वं ौ त्रिदिव पदं ोर्थिपत्वं, त्वा ांतत्त्वसारैर्निचि मुपचि मयन ो लक्ष्म ः।

त्पुष्ष ल्लुद्धिवृ ानुप शु ेच्छूनबी ेद्गतस्य, द्धासि स्यपा ः वच शलर स लपद्रुमस

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां षट्स्थानकवृत्तौ प्रवचनकौशलं नाम षष्ठं स्थानं समाप्तम् ।

तत्समाप्तौ च समाप्तं षट्स्थानकप्रकरणमपि श्रावकवक्तव्यताऽपरनामकं वृत्तित. । इति शुभमस्तु ॥

जिनेश्वरश्चान्द्रकुलावतंसो, दुर्वारवादिद्विपकेसरीन्द्रः । सन्नीतिरत्नाकरमुख्यतर्क,-ग्रन्थप्रणेता समभून्मुनीशः ॥ १ ॥
संवेगरङ्गशाला,-प्रजापतिः दवनसुधाकिरणः । दोपापचितिदिनेश,-स्ततोऽभवत्सूरिजिनचन्द्रः ॥ २ ॥
चक्रीव नव निधाना,-न्याविश्चक्रे सुपुण्यवृत्त्या यः । अङ्गानि स्थानादी,-न्यजन्यसावभयदेवगुरुः ॥ ३ ॥
जिनव भ-जिनदत्तौ, ततोऽपि सत्यविभावनोत्थायाः । श्रीपुष्पदन्तकीर्ते,-र्विलोपकौ सद्गुरू जातौ ॥ ४ ॥
तदनु जिनचन्द्रसूरि,-श्चन्द्र इवानन्दकन्दलनिदानम् । मूर्त्याऽपि विबुधमानससुकुमारमृदि जन्योः ॥ ५ ॥
जिनपतिरितिसूरिः सद्गुणागाढबन्धै,-र्निबिडनिगडितेवात्येति नो संयमश्रीः ।
क्वचिदपि पदमात्रं सर्वविद्यानवद्य,-प्रचयपरिचिताङ्गी यद्वपुष्टः सुपुष्टा ॥ ६ ॥
सकलगुणनिवेशः क्वापि नैवेति वादं, जगत इव विनेतुं धारयत्युग्रधामा ।
परिमितपरिपन्थिप्रोज्ज्वलत्ख्यातिमूलं, बत गुणनिकुरम्बं सांप्रतं यः शुभात्मा ॥ ७ ॥
तच्छिष्यो जिनपालः पद्स्थानकसंज्ञितप्रकरणस्य । वृत्तिं व्यधादमेधा अप्येतां स्वपरहितविधये ॥ ८ ॥
उत्सूत्रं विवृतं किञ्चिद्, यद्यत्र मतिमान्द्यतः । उत्सार्य तदमात्सर्यै-रार्यैः कार्यविचक्षणैः ॥ ९ ॥
युग-रस-दिनकरसंख्ये, (१२९२) वि वसुधेशवत्सरेऽतिगते । श्रीमालपुरे चैषा, समर्थिता माघशुक्लार्द्धे ॥१०॥
सि ान्तकनकनिकषैः, कारुण्यामृतपयोधिभिरतन्द्रैः । श्रीमज्जिनपतिसूरिभि,-रियं तु संशोधिता यत्नात् ११

ग्रन्थाग्रं १४९४

ी जिनदत्तसूरि ो र तरफथी शित ग्रन्थोनी ोंध.

नं . प्रताकारे ग्रन्थ.

१ श्री गणधर सार्ध सतकम्
२ श्री जयतिहुअणवृत्ति
३ श्री दिवालीकल्प
४ श्री प्रश्नोत्तर सार्ध सतकम्
५ श्री विशेष स म्
६ श्री संदेह दोहावली
७ श्री गि
८ श्री चैत्यवंदनकुलकवृत्ति
९ श्री अनुयोगद्वारसूत्र मूलम्
१० श्री कल्पसूत्र भाषान्तरम्
११ श्रीसंवेगरंग ा
१२ श्री द्वादशपर्व भाषान्तरम्
१३ श्री गणधर सार्ध स भाषान्तरम्

र प्रताकारे ग्रन्थ

१४ श्री श्रीपाल चरित्रम् प्राकृत भाषान्तर
१५ जीवविचारादि प्रकरण संग्रह
१६ श्री कल्याणमंदिर स्तोत्र टीका
१७ श्री षट्स्था वृत्ति

पुस्तकाकारे ग्रन्थ

१८ श्री गीरनार पूजा स्तवनादि
१९ श्री बृहत नावली भा. १
२० श्री थुइ सज्जाय संग्रह
२१ श्री श्रा नित्यकृत्य
२२ श्री जिनदत्तसूरि भा. १
२३ श्री जिनदत्तसूरि च. भा. २
२४ श्री बृहत् ावली
२५ श्री सप्त स्मरणादि

नं पुस्तकाकारे ग्रन्थ

२६ श्री कृपाविनोद
२७ श्री गहुंली संग्रह
२८ श्री पंच प्रतिक्रमण
२९ श्री जेसलमेर चमत्कार
३० श्री प्रा व्याकरणम्
३१ श्री जैन तत्त्व सारांश सचित्र

श्री पता ग्रन्थो की यादी.

१ श्री ोत्र टी पत्राकारे
२ श्री द्वादशकुलक वृत्ति ,,
३ श्री सप्तस्मरणादि िक ,,
४ श्री धन्ना–शालिभद्र चरित्र श्लो
५ श्री श्लोक संग्रह बुक

रू र

सा ।